THE ĀRYĀ-ŚATAKA

OF

APPAYYA DĪKṢITA

Edited for the First Time

BY

N. A. Gore, M. A.

With a Sanskrit Commentary

OF

V. Raghavan, M.A., Ph.D.

235
I

015,9x J50:9
H4D

POONA

1944

O15,gxJ50;g 1985
H4J
Diksilā, Appayya.
Arya-satakam.

015,9x J50:9
HAD

1985



SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

Please return this volume on or before the date last stamped.
Overdue volume will be charged ten paise per day.



श्रीमदप्पय्यदीक्षितविरचितम्

आ र्या - श त क म्

THE ĀRYĀ-S'ATAKA

OF APPAYYA DĪKṢITA

Edited

For the first time with an Introduction

BY

N. A. Gore, M. A.,
Professor of Sanskrit and Ardhamagadhi,
S. P. College, Poona.

With a Sanskrit Commentary

OF

Dr. V. Raghavan, M. A., Ph. D.
University of Madras.

POONA

1944

Price Re. 1-4-0

O15,gx J50:g
H4D
1678

All rights reserved by the Publisher

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY.
Jangamwadi Math, VARANASI,
Acc. No. 1985

Printed by :—S. R. Sardesai, B.A., LL.B., Navin Samarth Vidyalaya's
Samarth Bharat Press, 41 Budhwar, Poona 2.
Published by :—Prof. N. A. Gore, M.A., 12, Vishnu Sadan,
327 Sadashiv, Poona 2.




Dedicated

to

My Grand-mother

Annapurnabai Gore



CONTENTS



PREFACE

When I read a paper on the *Āryā-Śataka* in the Classical Sanskrit Section of the twelfth All-India Oriental Conference held at Benares in December 1943, the scholars present evinced great interest in the extracts from this charming little poem ascribed to the celebrated Appayya Dīkṣita and Mm. P. V. Kane and Dr. J. B. Chaudhari, among others, pointed out the desirability of publishing the poem, thus lending support to the suggestion of Dr. Raghavan to the same effect. Accordingly, the text of the poem along with the paper read at the Conference was first published in the *Poona Orientalist* Vol. VIII Nos. 3-4.

This edition is the result of suggestions I received on publication of the Poem that it should be made available separately in the form of a book. Then I requested Dr. Raghavan to write a Sanskrit Commentary to the poem and it gives me great pleasure to publish the text along with his brief and lucid commentary.

On the strength of the Colophons and the general tenor of the poem I have tentatively ascribed it to the celebrated Appayya Dīkṣita. I shall be thankful to the learned readers if they will favour me with their views and evidence to enable me to settle the problem of the authorship of the poem.

I offer hearty thanks to Dr. Raghavan for readily consenting to write the commentary on the poem and

helping me with suggestions in the constitution of the text. I am very thankful to my Guru Prof. H. D. Velankar for encouragement and suggestions I have received from him in the preparation of this edition. I offer grateful thanks to my maternal uncle Mr. Balkrishna H. Lele for granting some financial aid in the printing of this edition. The management of the Deccan Paper Mills deserves thanks for supplying me at controlled rates the paper required for this edition. My student-friends Mr. N. V. Saswadkar and Mr. S. V. Prabhu prepared the copies of the Manuscripts and to them my thanks are due. I tender thanks to Dr. R. N. Sardesai, L.C.P.S., the proprietor of the Poona Orientalist for permission to issue the poem in this edition and to the Manager of the Samarth Bharat Press, Poona, for printing the work with enthusiasm and great care.

Poona 2,
August 1944. N. A. Gore

INTRODUCTION

The Manuscript Material

The *Catalogus Catalogorum* of Aufrecht records a single manuscript only of the *Āryāśataka* of Appayya Dīkṣita.[1] The manuscript belonged to the private manuscript Collection of Mr. Govinda Shastri Nirantar of Nasik and probably due to this fact the work does not seem to have attracted the attention of scholars even though it was ascribed to Appayya Dīkṣita. Recently, however, I discovered or more correctly speaking re-discovered a manuscript of the *Āryā-Śataka* of Appyya Dīkṣita in the MSS. Collection at the Mīmāṁsā Vidyālaya of Poona. When I sent a description of it, along with that of other MSS. in the Collection to my friend Dr. V. Raghavan for being used in the preparation of the New Catalogus Catalogorum which is undertaken by the University of Madras, he pointed out to me the desirability of publishing it and supplied me information about two more MSS. of the same work—one belonging to the MSS. Collection of Pandit Raghunatha Shastri Patankar of Rajapur and the other to the Prājña Pāṭha Śālā, Wai. Through the courtesy of Pandit Raghunatha Shastri Patankar and Pandit Laksmana Shastri Joshi, the Hon. Secretary of the Prājña Pāṭha Śālā, I have been able to secure both of these manuscripts.

As yet we do not know the whereabouts of the Nasik MS. The manuscripts belonging to the late Govinda Shastri Nirantar have been recently purchased by the Bombay University Library but some of the manuscripts in the Collec-

---

1. Āryā-Śataka by Appayya Dīkṣita, BL. 44—CC. II. 10.
[BL = List of Sanskrit MSS. in Private Libraries in the Bombay Presidency, Prepared by Dr. R. G. Bhandarkar, Bombay, 1893.]

tion as originally listed by Dr. Bhandarkar are missing from the collection secured by the University Library. Unfortunately, the *Āryā-Śataka* of Appayy Dīkṣita is one of the missing MSS., I record here its description as given by Dr. Bhandarkar as a clue to the identification of the Nirantar manuscript, if by chance some more manuscripts of the *Āryā-Śataka* are discovered later on :—No. 44 आर्याशतकम्—पत्राणि ५ ; पंक्तयः १० ; अक्षराणि ३८ ; ग्रंथसंख्या १२५ ; कर्ता अप्पय्यदीक्षित ; आरंभः। दयया यदीयया वाक् नवरसरुचिरा सुधाधिकोदेति। शरणागतचिंतितदं तं शिवचिंतामणिं वंदे॥ समाप्तिः। निर्व्याधि मे शरीरं निराधि चेतः सदा समाधिपरम्। कुरु शर्व सर्वदा त्वं नान्यं कामं वृणे कंचित् ॥ ९९ ॥ आर्यापतेः पदाब्जे निहितं शतपद्यपत्रमयपुष्पम्। आर्याशतं सुकृतिनां हृदयामोदं सदा वहतु ॥ १०० ॥

At present, therefore, we have the *Āryā-Śataka* preserved only in three MSS. at Poona, Rajapur and Wai. As all the MSS. are complete, it has been possible to bring out a reliable edition of the text of the *Āryā-Śataka* with the help of these three MSS.

Description of the Manuscripts

1. The Mīmāṁsā Vidyālaya MS. (= MS. M) :

   Size—9 inches by 4·7 inches.

   Foll.—6 ; lines 11 to a page and about 30 letters to a line.

   Material—Hand-made paper.

   Script—Devanāgarī. Handwriting bold, uniform and legible.

   Extent—Complete.

   Age—The MS. appears to be about 150 or 200 years old. Marginal corrections are found on 9 out of

12 pages. Yellow pigment is used to remove unwanted letters or parts thereof. The MS. is carefully revised and is mostly correct.

Begins—(fol. 1^a) श्रीरस्तु। दयया यदीयया वाक् नवरसरुचिरा etc.

Ends—(fol. 6^b) आर्याशतं सुकृतिनां हृदयामोदं सदा वहतु ॥ १०० ॥

Colophon—श्रीमदपय्यदीक्षितविरचितार्याशतकं संपूर्णं ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ कलंकी शीतांशुः कुटिलहृदया सापि तटिनी पशुर्नंदी सोयं कठिनहृदया शैलतनया। निषेधादन्येषां सततसमवेते दयितया कृतां वा मद्भक्तिं भव भवति विज्ञापयति कः ॥
अपय्यदीक्षितकृत-शतक पत्रें ६.

2. The Rajapur Manuscript (= MS. R):

Size—6·8 inches by 5·5 inches.

Foll.—6 ; lines 20 to a page and about 16 to 20 letters to a line.

Material—Mill-made paper.

Script—Devanāgarī. Handwriting beautiful, small, uniform and legible.

Extent—Complete.

Age—The MS. must be assigned to the end of the 19th or the beginning of the 20th century A. D., as the watermark on fol. 1 has the following name and date in it : AMIRIE & .... 1875.

Begins—(fol. 1^b) श्रीगणेशाय नमः दयया यदीयया वाक् नवरसरुचिरा etc.

Ends—(fol. 10^a) आर्याशतं सुकृतिनां हृदयामोदं सदा वहतु ॥ १०० ॥

Colophon—इति श्रीमद्भरद्वाजकुलतीलकश्रीमदप्पयादीक्षितविरचितं शैवार्याशतकं समाप्तं ॥ ॥ श्रीरस्तु ॥ ॥ शुभं भवतु ॥

Fol. 1^a has श्रीयुत भिकाजी गोविंद बोरवणकर, राजापुर इत्येतैः

श्रीसंस्कृत पुस्तक संग्रहालय बंदर राजापुर, जिल्हा, रत्नागिरी

प्रदत्तम् and श्रीमदप्पैया दीक्षितविरचितं शैवार्यां शतकम्। and on fol. 6^b is written भि. गो. बो. दत्तम्। श्रीमदप्पैयादीक्षितकृत-शैवार्याशतकम् ॥

The MS. is written breadth-wise, like a book; and each line contains a half of the stanza. It does not bear marks of revision and contains many scribal errors.

3. The Prājña Pāṭha Śālā Manuscript (=MS. P):

Size—Of foll. 1–5, 18 inches by 5·6 inches; of fol. 6, 9 inches by 5·6 inches.

Foll.—6; lines 37–41 to a page and about 20 letters to a line; fol. 6 has only 16 lines.

Material—Hand-made paper of a rough texture.

Script—Devanāgarī. Hand-writing very bold, uniform and legible. The MS. is written only on one side of the paper. On fol. 6^b some monetary account is entered in *Moḍī* script.

Extent—Complete.

Age—1802 A. D. See colophon below.

Begins—(fol. 1^a) शिवार्या प्रारंभः ॥ आपय्या दीक्षितविरचित. श्रीगणेशायनमः ॥ दयया यदीयया वाक् नवरसरुचिरा etc.

Ends—(fol. 6^a) आर्याशतं सुकृतिनां हृदयामोदं सदा वहतु ॥१००॥

Colophon—इतिश्रीमद्दापय्यादीक्षितिविरचित शिवार्याशतक समाप्तं॥ ॥ छ ॥ श्रीसांवार्पणमस्तु शके १७२४ चैत्र वद्य १२ गुरुवासरे इदं पुस्तकं समाप्तं ॥ ॥ छ ॥ ॥ छ ॥

The Text

All the MSS. present essentially the same text, the variant readings notwithstanding. But the stanzas 26, 27,

28 of M and P are given by the R in the order of 28, 26, 27 respectively ; 98th of M and P is omitted by R ; 99th is counted as the 98th and कुरु बहुशास्त्राभ्यासं साधय योगांश्च तेन सुलभोऽहं । कथमत्र ' नायमात्मे 'त्यादि श्रृण्वन्मनः कुर्यात् ॥ is given as the 99th. The stanza कलंकी शीतांशुः etc. in the Śikhariṇī metre found in M after the colophon is omitted by R and P.

The Title

Though the title ' Śaivāryā-Śataka ' of the R or Śivāryā Śataka of the P is more significant than the mere ' Āryā-Śataka ' of the M, the latter is to be found in the last stanza of the Poem itself, is the title of the oldest of the three MSS. used by me and it is found in the Nirantar MS. also and hence it has been adopted by me.

The Author

In the MSS. M and P the colophon gives the author's name as श्रीमदपय्य (or य्या) दीक्षित or श्रीमदाप्पय्यादीक्षित only, while that of the MS. R gives it as भरद्वाजकुल-तिलकश्रीमदपैया दीक्षित. I have seen three lists[1] of the works of the celebrated Appayya Dīkṣita but the *Āryā-Śataka* or Śiva° or Śaivāryā-Śataka is not to be found in any one of them. On the other hand, Dr. V. Raghavan has shown[2]

---

1. (*a*) *Śivādvaita-nirṇaya* of Appayya Dīkṣita ed. by S. S. Suryanarayan Sastri, University of Madras, 1929—Intro. pp. 10–15.
   (*b*) *Madva-tantra-mukha-mardanam* of Appayya Dīkṣita, Ānandāśrama Sk. Series, No. 113, Poona, 1940—Intro-pp. 6–7.
   (*c*) —Do— ed. by Pandit Rāmanātha Dīkṣita, Benares 1941—Intro. pp. 3-4.
2. (*a*) " Appayya Dīkṣitas II and III ", Proc. X, All-India Ori. Conf. pp. 176–180.
   (*b*) "Some Appayya Dīkṣitas", Annals of Oriental Research, University of Madras, Vol. VI, pt. 1.

how some of the works which are assigned to the great Appayya Dīkṣita are really the works of other authors bearing the same or a similar name. Two of these latter belonged to the family of the great Appaya Dīkṣita, the son of Raṅgarājādvarin, of Bharadvāja gotra and are designated by Dr. Raghavan as Appaya Dīkṣita II and Appayya Dīkṣita III. In the absence, therefore, of an evidence of more definite nature such as the mention of the names of the parents, the mere statement that the author is Appaya Dīkṣita belonging to the Bharadvāja gotra would not justify us in assigning the present work to the celebrated Appaya Dīkṣita I (1558–1630 A. D. or 1520–1592 A. D.). But if we take into consideration the fact that the great Appayya Dīkṣita, though not a bigot, was an ardent devotee of Śiva, the wording of the colophon of the MS. R—भरद्वाजकुलतिलक-श्रीमदप्पैया दीक्षित—and the contents of the *Āryā-Śataka*, I hope we would not be far wrong if we tentatively ascribe the *Āryā-Śataka* to the great Appayya Dīkṣita himself.

The Poem

The *Āryā-Śataka* is so named because it consists of 100 stanzas in Āryā metre. It is written in easy, flowing and graceful language. In it the author fervently appeals to God Śiva to receive him into His favour, to destroy his enemy in the form of worldly existence, to remove his poverty and to produce a sense of devotion in him. The Poem may be roughly divided into two parts of fifty stanzas each. In the first part, which is a sort of a dramatic monologue, the author imagines that as he approaches Lord Śiva, He would raise objections to the qualifications of the author to be a recipient of His Grace. The author meets these objections by witty and

punning references to the several epithets of Śiva and explains away the defects in himself :—e. g.

चेतसि चिंतय वामां वा, मां वा, न द्विधा स्थितस्याहम् ।
इति यदि वदसि दयाब्धे वामार्धे सा तवाप्यस्ति ॥ ५ ॥
मित्रकलत्रसुतादीन् ध्यायस्यनिशं न मां क्षणं जातु ।
यदि कुप्यसि मयि दीने तुलयामि त्वां कथं सह तैः ॥ ६ ॥
ललनालोलविलोकनजितमित्यवमन्यसे कथं मां त्वम् ।
त्वयि जायार्धशरीरे शिव शिव नालोकनानुभवः ॥ ९ ॥
गुणहीनतां तनूजे मयि दृष्ट्वा किं परित्यजस्येवम् ।
उचितं गुणिनस्त्वेतन्निर्गुणरूपस्य तेऽनुचितम् ॥ १५ ॥
पुत्रः पितृवत् पुत्री मातृवदित्थं ममात्र को दोषः ।
अहमपि भोगासक्तः प्रकृतिर्जाता विषादवती ॥ ११ ॥

Śiva is called पञ्चानन. The author has punningly expressed this idea in the following stanza :

कामक्रोधकटाभ्यां मदजलधारां निरंकुशे स्रवति ।
मत्कृतदुष्कृतकरिणि प्रकटा पञ्चास्यता तेऽस्तु ॥ १६ ॥

The same fact is expressed by a reference to the system of *Village Pañcāyats* :

तव कोऽहं त्वं मम कः पञ्चस्त्वेवं विचारयस्वेति ।
ब्रूपे दीनदयाब्धे पञ्चमुखत्वं त्वयि व्यक्तम् ॥ २३ ॥

He has utilized the names विश्वेश and भूतपति to show how it is necessary for Lord Śiva to protect him, if these names are to be significant :

पालय वा मां मा वा मत्तनुभूता नु पञ्चभूततति: ।
पोष्यावश्यं भवता भविता नो चेन्न भूतपतिः ॥ ४१ ॥
नाङ्गीकृतो मया त्वं तत एव न दर्शनं मम तवास्ति ।
इति नोत्तरं प्रदेयं शिव शिव विश्वेशनामासि ॥ ४५ ॥

If Śiva were to say that the author should not expect to get anything from Him as He was only दिगम्बर, and so he

should go to another donor, it is pointed out that he is also श्रीकण्ठ (having the goddess of Wealth in His throat):

याचस्वान्यं धनिनं भविता तव को दिगम्बराल्लाभः ।
मां मा प्रतारयैवं ख्यातः श्रीकण्ठनामासि ॥ २४ ॥

Similarly there are about 15 references to the अर्धनारी-नटेश्वर form of God Śiva, e. g. ललनाकलितं महः (2) त्वयि जायार्धशरीरे (९) and so on. The name महादेव suggests the following idea to the poet's mind :

सस्ये तृणे च वृष्टिं तुल्यां देवः सदैव विदधाति ।
देवो महान् बत त्वं गुरुलघुवार्तां कथं कुरुषे ॥ ३३ ॥

The mythological allusion that कुबेर has been made the lord of wealth by Śiva has given rise to the following three stanzas :

यक्षाधीनां रक्षां त्र्यक्ष निधीनां कुतो नु वा कुरुषे ।
साक्षान्मनुष्यधर्मोऽप्यहह कथं नु विस्मृतिर्मम ते ॥ ३८ ॥
धनदे सखित्वमेतत्तव यत्तत्रास्ति विस्मयः क इव ।
मयि निर्धने तदास्तां त्रिजगति चित्रं कियद्भावि ॥ ३९ ॥
सखितारूपनिधानं वित्तनिधानं द्विधा धनं तव यत् ।
नैककरे नृपनीतिस्तत्रान्यतरन्निधेहि मयि ॥ ४० ॥

If Śiva refuses to favour the author, on the ground of his being a half-hearted devotee, the author justifies himself by pointing out that everything about Śiva is 'half' and incomplete :

वपुरर्धं वामार्धं शिरसि शशी सोपि भूषणं तेऽर्धम् ।
मामपि तवार्धभक्तं शिव शिव देहे न धारयसि ॥ १२ ॥

Remembering that Śiva had burnt Cupid (मनोभव) to ashes, the poet requests Him to destroy his poverty for that also like Cupid infatuates his mind :

दारिद्र्याख्यमनोभूः क्लीबं चेतोऽपि मोहयत्यनिशम् ।
एनं लीनं कर्तुं धन्यः कोन्यस्त्वदन्योस्ति ॥ ५० ॥

In the second part, the author exhorts his heart and the five senses of perception to devote themselves to Śiva : e. g.

चेतः शृणु मद्वचनं मा कुरु रचनं मनोरथानां त्वम्।
शरणं प्रयाहि शर्वं सर्वं सकृदेव सोर्पयिता ॥ ५६ ॥

रसने रसान् समस्तान् रसयित्वा तद्विवेचने कुशला।
असि तद्वदाशु पश्येः शिवनाम्नः को रसोयमिति ॥ ६३ ॥

लोचन कोभूल्लाभः सर्वानेव द्विलोचनान् वीक्ष्य।
दृष्टस्त्रिलोचनश्चेत् सफलं जन्मैव ते भावि ॥ ६६ ॥

श्रवण सखे शृणु मे त्वं यद्यपि जातो बहुश्रुतोस्ति भवान्।
शब्दातीतं श्रोतुं शिवमन्त्रात् को परो मन्त्रः ॥ ६९ ॥

घ्राण प्राणसखा मे भवसि भवान् पार्थिवोस्ति किमुवान्यत्।
शिवपदकमलामोदे मोदं गन्तासि यदि शीघ्रम् ॥ ७० ॥

रामास्पर्शसुखे ते नितरां भो विग्रहाग्रहोस्ति यदि।
आलिंगयार्धरामं रामाभिन्नः स्वयं भवसि ॥ ७१ ॥

Just as pun and wit are a feature of the first part, metaphor is prominently seen in the second, for example, the चेतः is identified with विहग, मधुकर, सदागति, चकोर, कुरंग and उपल; the रसना with पल्लव and so on.

These are allusions to the mythological stories of मार्कण्डेय attaining immortality, though he was destined to be short-lived, to that of उपमन्यु obtaining the क्षीरसमुद्र through Śiva's favour, to that of व्याध securing salvation even though he placed his foot on the head of Śiva, and of अर्जुन fighting with Śiva in the form of किरातः—

दिष्टोद्दिष्टं दास्यास्यन्यत्नेष्टं यदि स्फुटं वाक्यम्।
दत्ता कथं त्वयासावजरामरता मृकण्डुजनेः ॥ ३४ ॥
नादत्तं प्राप्नोतीत्येतद्वाक्यं प्रतारणामात्रम्।
उपमन्युना कदा वा कस्मै दुग्धोदधिर्दत्तः ॥ ३५ ॥
अपराधकारिणं मां मत्वा शंभो यदि त्यजस्येव।
व्याधः शिरसि पदं ते दत्वा न जगाम किं मुक्तिम् ॥ ७४ ॥

पार्थः कलहं धनुषा ताडनमपि मूर्ध्नि ते न किं कृतवान् ।
तत्रापि ते प्रसन्नं चेतः सन्ने मयि कुतो न ॥ ७५ ॥

Then the poet praises Lord Śiva in the अर्धनारीश्वर form in the last 10 stanzas and lastly prays that his body and mind should be free from affliction, his heart devoted to contemplation—this is all that he desires through the favour of Śiva and nothing else.

Though this Poem cannot be called an example of the उत्तम-काव्य, the expressed sense being equally if not more striking than the suggested sense, [e. g. चेतःकीर विहारं परिहर परितः प्रयत्नेन । अत्तुं कालबिडालो धावति शिवपञ्जरं प्रविश ॥ ५४ ॥], it is a delightful composition on account of the power of the author to express a striking idea in a happy, flowing style. What is particularly note-worthy is the under-current of humour that runs throughout the poem. But as we read it, an indelible impression is left on our mind that the author, inspite of his light-heartedness and humour, was a sincere devotee of Śiva and his main concern is that Lord Śiva should bless him with His favour. From the several references[1] to the अर्धनारीश्वर form of Śiva that are found in this short poem, it may be suggested that the author was a worshipper of Śiva in his अर्धनारीश्वर form.

Addendum—In the 2nd l. of stz. 81 all the three MSS. read विषयविपाशनतः, and the learned commentator has explained it in the only way in which it can be explained. But the trend of the stanza suggests that विषयविपाशन constitutes the reason why the post calls himself a पशु *i.e.* 'विप' must be a characteristic food of a पशु, here a bull. This sense can be obtained by emending विप to—बुस or बुप and reading the expression विषयबुसाशनतः and explaining it as विषयरूप बुसस्य कडंगरस्य अशनतः भक्षणाद्धेतोः. I am thankful to Pandit Maheshvarshastri Joshi of Poona for suggesting this emendation.

---

1. Stzs. 2, 5, 9, 12, 14, 44, 61, 71, 73, 90, 91, 92, 93, 94, 98.

श्रीमदप्पय्यदीक्षितविरचितम्

आर्याशतकम्

श्रीराघवशर्मकृतटीकोपेतम् ॥

दयया यदीयया वाङ् नवरसरुचिरा सुधाधिकोदेति ।
शरणागतचिन्तितदं तं शिवचिन्तामणिं वन्दे ॥ १ ॥

अप्पयदीक्षितविलिखितशैवार्यासौष्ठवोन्मेषम् ।
वृत्त्या तूलिकया लघु कुरुते कुतुकेन राघवकलावित् ॥

भरद्वाजकुलतिलकायमाना अप्पय्यदीक्षिताः चतुरधिकशतप्रबन्धकर्तृतया प्रसिद्धा वा, तद्वंश्या अन्ये वा केचन तन्नामानः शतमानाभिरार्याभिः आर्यापतिं प्रपद्यमानाः 'तं शिवचिंतामणिं वन्दे' इति नमस्कारेण समङ्गलमुपक्रमन्ते । दययेति । यदीयया दयया यस्य शिवचिन्तामणेः करुणया नवभी रसै रुचिरा । माधुर्येण सुधाया अप्यधिका वाग् ईदृशी देवविषया काव्यरूपा उदेति तं शरणागतचिन्तितदं शिवचिन्तामणिं वन्दे । शरणागतैः यद्यच्चिन्त्यते तत्सर्वं ददातीति, तम् शरणागतचिन्तितदम् । अनेन शिवस्य चिन्तामणित्वरूपणं समर्थितं भवति; चिन्ताप्रदो हि मणिः चिन्तामणिः । तत्प्रसादपरिणामा एवेमा आर्यारूपा मे वाच इति भावः ॥ १ ॥

शिरसि सितांशुकलाढ्यं करुणापीयूषपूरितं नयने ।
स्मितदुग्धमुग्धवदनं ललनाकलितं महः कलये ॥ २ ॥

शिरसीति । चन्द्रकलाङ्कितशिरस्कम्, दयासुधापूर्णनयनम्, मन्दस्मितपयोमनोहरमुखम् ललनाकलितम् अर्धनारीरूपम् महः शिवरूपम् तेजः कलये इत्यर्थः ॥ २ ॥

अन्ते चिन्तयते यत्तत्तामेतीति च त्वया गदितम् ।
शिव तव चरणद्वन्द्वध्यानान्निर्द्वन्द्वता चित्रम् ॥ ३ ॥

अन्त इति। अन्ते प्राणान्तकाले जनः यत् चिन्तयते तत्ताम् तस्य भावम् एतीति यत् त्वया भगवता गदितम् भवदाज्ञारूपश्रुतिस्मृतिषु । यथा श्रूयते छान्दोग्ये (३.१४. १.) 'यथाक्रतुरस्मिन् लोके पुरुषो भवति, तथेतः प्रेत्य भवति' इति। स्मर्यते च गीतासु (८. ६): 'यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्। तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥' इति। क्रतुः संकल्पः। अयं च वेदान्तिभिः तत्क्रतुन्याय इतीर्यते। अन्तकाले यद्-ध्यानेन प्राणांस्त्यजति तद्भावं प्रेत्य भजतीति हि अनेन न्यायेन उक्तम्। हे शिव! त्वच्चरणद्वन्द्वध्यानात्तु निर्द्वन्द्वता लभ्यत इति चित्रमाश्चर्यम्। निर्द्वन्द्वता नाम निर्गतशीतोष्णसुखदुःखादिद्वन्द्वभावः। यथा चोक्तं वेदान्त-देशिकैः यादवाभ्युदयकाव्ये दामोदरलीलावर्णने (४. ३५)-

'बद्धं तथा भावयतां मुकुन्दमयत्नविच्छेदिनि कर्मबन्धे।
तपस्विनी तत्क्रतुनीतिराद्या सव्रीडमारण्यकथासु तस्थौ ॥' इति ॥३॥

द्रुतमुद्धर हर[2] संहर संहर भववैरिणं त्वतित्वरया।
भव भवतोऽपि भवोऽयं रिपुरेतन्निन्दितं जगति ॥ ४ ॥

द्रुतमिति। द्रुतं त्वरितम् उद्धर। संसारविपदः मामिति शेषः। अतित्वरया भववैरिणं संसाररूपशत्रुम् संहर संहर। त्वराप्रयुक्ता वीप्सा। अथवा संहर दुर्धरभववैरिणमिति पाठः। दुर्धरो दुस्सहो भववैरी तम्। हे हरेति अभिप्राय-गर्भा संबुद्धिः। हे भव! अयं भवः संसारः भवतोऽपि तवापि रिपुः। न केवलं मम, अपि तु तवापि, यतः समाननाम्नोः निसर्गतो वैरमस्ति। यथाह कालिदासः-'अन्यथा जगति राम इत्यसौ शब्द उच्चरित एव मामगात्। व्रीडमावहति मे स संप्रति व्यस्तवृत्तिरुदयोन्मुखे त्वयि॥ (रघु. ११. ७३)। परमेश्वरो भवानपि भवः, अयं निकृष्टोऽपि भव इत्येतत् जगति निन्दितं गर्हितं भवति। अथवा एतं निन्दितं जहिहि इति पाठः स्यात्। निन्दितम् एतं भवरूपं रिपुं जहिहि दूरमुत्सारय ॥ ४ ॥

---

१. यत्तत्तदेतीति—R. २. संहर हर दुर्धर भव°—R.

चेतसि चिन्तय वामां वा मां वा न द्विधा स्थितस्याहम्[३] ।
इति यदि वदसि दयाब्धे वामार्धे सा तवाप्यस्ति ॥ ५ ॥

चेतसीति । वामां स्त्रियं वा, मां वा चेतसि चिन्तय; द्विधा स्थितस्य कामकामायुंभयलोलायमानमानसस्य नाहम् भवामि । हे दयाब्धे शिव ! दयालुस्सन्नपि त्वं यदि एवं मां वदसि, अहमेवमुत्तरं दद्याम् । कथमिति चेत् ? वामा स्त्री पार्वती तवापि अर्धे शरीरार्धे अस्ति, यतः अर्धनारीश्वरस्त्वम् । ननु त्वमपि न केवलं न वामाविमुखः, परन्तु तथा विभक्तस्वशरीरोऽप्यसि । अहं वामां चित्त एव चिन्तयामि, त्वं पुनः, यथा चेदं न दृष्टं श्रुतं वा प्रपञ्चे, तथा शरीरेणैव तां वहसि । चेतसीत्याद्यारभ्य कविशिवयोः संवादरूपः सन्दर्भः । प्रसादमिच्छते भक्ताय तदवितरणे हेतवो भगवता प्रदर्श्यन्त इति कृत्वा तद्धेतूनां समाधानोत्तराणि भक्तेन दीयन्ते ॥ ५ ॥

मित्रकलत्रसुतादीन् ध्यायस्यनिशं न मां क्षणं जातु ।
यदि कुप्यसि मयि दीने तुलयामि त्वां कथं सह तैः ॥ ६ ॥

मित्रेति । अनिशं मित्रकलत्रसुतादीन् ध्यायसि, न मां क्षणमपि जातु कदाचित् ध्यायसि इति यदि मयि दीने कुप्यसि त्वं, तदा भगवन्तं त्वामेवं वदामि; त्वां तैस्सह कथं तुलयामि । 'मित्रकलत्रादिभिर्हि पदे पदे तं स्मरसि न मां, सा ते प्रिया नाहम्' इत्यादि कथ्यते । त्वं पुनः परमेश्वरः किमर्थं तैः मदीय-मित्रकलत्रसुतादिभिः मामनिशमाकुलयद्भिः आत्मानं समानीकृत्य अनुचितं कोपं व्रजसि ? तत्सत्कारकर्मभिर्दीनस्य मे आन्तरं भावं ननु भवानेव मे परमः सुहृद् बन्धुश्च जानाति । नापि मे समुचितमिदं यद् यादृश्या वृत्त्या तानुप-चरामि, तयैव भवतोऽप्युपचार इति ॥ ६ ॥

मत्कृतदुष्कृतशान्तिर्विषवह्निजलादियातनया ।
यदि निश्चयस्तवायं प्रेषय गरलाग्निगङ्गौघान् ॥ ७ ॥

मत्कृतेति । त्वं पापी; पापशान्तये नरकयातना अनुभव । यावच्च त्वं पापेभ्योऽपूतः तावच्च न सुलभस्ते ममानुग्रहः इति भगवत आक्षेपमुत्थाप्यो-

---

३. °स्थितश्चाहम्—R.

त्तरयति मत्कृतेति । विषवह्निजलादियातनया । विषवह्निजलादिभिः प्रयुक्ताः नरके यमाज्ञया पापिनां तत्पापानुरूपाः यातनाः प्रवर्त्यन्ते, ताभिश्च यातनाभिः पापफलानुभूत्या पापशान्तिः भवति । तादृशयातनयैव मत्कृतदुष्कृतशान्तिः मत्कृतपापकर्मशान्तिः भविष्यति इति यदि तवायं निश्चयः, भवतु नाम स निश्चयः, भवतु च तादृशी यातना मे पापशान्तये; किन्तु यातनार्थानि विषवह्निजलानि तव शरीर एव कण्ठे गरलरूपेण, भाले नेत्राग्निरूपेण, शिरसि गङ्गौघरूपेण च सन्ति; तानि मत्पावनाय प्रेषय ॥ ७ ॥

भोगं विहाय योगं साधय दास्ये तवापि परभागम् ।
मम किं न वावकाशस्त्वद्भूषाभोगिनां मध्ये ॥ ८ ॥

भोगमिति । त्वं भोगासक्तः न योगासक्तः, कथमनुग्राह्यो मे इत्याक्षेपमुक्त्वा प्रतिक्षिपति भोगमिति । भोगमैन्द्रियिकसुखासङ्गं विहाय योगं मयि चित्तनिवेशनरूप साधय, तदा तवापि परभागमुत्कर्षं दास्ये इति हे शिव वदसि चेदेवमास्ते ते उत्तरम्—त्वद्भूषाभोगिनां त्वद्भूषणभूतानां भोगिनां सर्पाणां बहूनां मध्ये मम एकस्य भोगिनः किम् अवकाशो नास्ति ? यदि भोगिन इमे तव अलंकारीभवितुमुचितम्, तदा भोगी अहमपि एकस्ते नातिभाराय स्याम्; मामप्यङ्गीकुरु, आदाय आभरणीकुरु च । भोग इति श्लिष्टं पदम् । 'भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः' इत्यमरः ॥८॥

ललनालोलविलोकनजितमित्यवमन्यसे कथं मां त्वम् ।
त्वयि जायार्धशरीरे शिव[४] शिव नाऽऽलोकनानुभवः ॥ ९ ॥

ललनेति । ललनानां लोलं चञ्चलं यद् विलोकनं तेन जितमिति मां त्वम् कथमवमन्यसे । अहं स्त्रीदृष्टिवश इति नोचिता मयि ते अवज्ञा । यतः त्वयि जायार्धशरीरे सति शरीरैकार्धनिहितभार्ये सति न आलोकनस्य अनुभवः, न ते जायाविलोकनानुभवः संभवति । न हि एकस्मिन्नेव वक्त्रे एकं नेत्रं परं वीक्षितुं क्षमते । शिव शिवेति करुणवाचिकानुभावः, जायालोकनसुख-

४. शिव शिव लोके हि ननुमिवः (?)—R.

वञ्चितं शिवं प्रति अनुकंपाद्योतकः। यतस्तव स्त्रीदृष्टिपातसंभवो नास्ति, ततः तदरसिकः तच्छक्त्यनभिज्ञश्च त्वं माम् अहं स्त्रीदृष्टिजित इति अवजानासि। जायार्धशरीर इति साभिप्रायो निर्देशः, अहं केवलं ललनालोकनजितः, भवान् पुनः ललनामेव शरीरे बिभर्ति इति परिहासद्योतनार्थः ॥ ९ ॥

स्मरणादनुपदमीदृग्विस्मृतिशीलो न वल्लभोऽसि मम।
उत्पाद्याशां[५] भङ्क्तुर्लग्ना वृत्तिस्तवैवेयम् ॥ १० ॥

स्मरणादिति। अविच्छिन्नकृतभगवत्स्मृतेर्हि भगवान् प्रसीदेत्, अहं पुनः न तथा इति शङ्कामुत्थाप्य प्रतिवक्ति। स्मरणाद् अनुपदम्, स्मृत्वा तदनन्तरं सहसैव विस्मृतिशीलः त्वं मम न वल्लभोऽसीति शिवोक्तिः। प्रथमं स्मरति मयि रक्षिष्यामीति आशां मयि उत्पाद्य, अद्य मां त्वं न रक्षसि, विस्मृतवानिति हेतोः यत् तत्तवैव इयं आशामुत्पाद्य भंक्तुः वृत्तिः आशाभङ्गरूपा पूर्वापरविरुद्धा वृत्तिः लग्ना त्वत्तो मयि संक्रान्ता। विस्मरणशीले किं मयि दोषः किं कृतप्रतिज्ञात्यागिनि भवति दोषः इति आशयः ॥१०॥

पुत्रः पितृवत्पुत्री मातृवदित्थं ममात्र को दोषः।
अहमपि भोगासक्तः प्रकृतिर्जाता विषादवती ॥ ११ ॥

भक्तः स्वस्य भोगासक्ततायां शोकाकुलतायां च न कोऽपि दोष इत्याह पुत्र इति। 'पितॄन् समनुवर्तन्ते नराः, मातरमङ्गनाः' इति रामायणोक्त-प्रकारेण लोकसिद्धमेतद् यत् पुत्रः पितृवद् वर्तते गुणे, पुत्री च मातृवत्। इत्थमत्र ईदृशेऽस्मिन् विषये मम को दोषः। कीदृशे विषये? तव पुत्रोऽ-हमपि त्वमिव भोगासक्तः, मम प्रकृतिश्च तन्मातृभूतपार्वतीवद् विषादवती जाता इत्यस्मिन् विषये। भोगासक्तः सुखासक्तः सर्पशरीरासक्तश्च। विषाद-वती दुःखवती, शिवयुक्ता च। विषमत्तीति विषादः शिवः ॥ ११ ॥

---

५. उत्पाट्याशां—R.

वपुरर्धं वामार्धं शिरसि शशी सोऽपि भूषणं तेऽर्धम् ।
मामपि तवार्धभक्तं शिव शिव देहे न धारयसि ॥ १२ ॥

स्वस्य अपूर्णभक्तता न दोषाय, यतो भगवतोऽपूर्णवस्तुषु प्रसिद्ध आदर-विशेष इत्याह वपुरर्धमिति । वपुः तव शरीरम् अर्धम्, अर्धमेव । वामा ते प्रिया च त्वद्विभक्तशरीरा अर्धम्, अर्धमेव ते प्राप्ता । ते शिरसि भूषणं सः शश्यपि चन्द्रोऽपि अर्धमेव अंशत एव एककलारूपेण वर्तते । तव अर्धभक्तं लेशतो भक्तं मामपि देहे न धारयसि । शिव शिवेति करुणोक्तिः अधारणप्रयुक्तशोकद्योतिका ॥ १२ ॥

स्तनपं शिशुं त्वदीयं पालय साम्ब द्रुतं न पासि यदि ।
जगतः पितेति गीतं यातं नामेति जानीहि ॥ १३ ॥

क्षीरकण्टकोऽहं मुग्धडिम्भः, त्वं च साम्बः जगतः पितासि यथार्थय ते प्रथामित्याह स्तनपमिति । स्तनपं स्तन्यपायिनं त्वदीयं शिशुं मामिति शेषः । हे साम्ब ! अम्बया सह वर्तमान ! साभिप्राया संबुद्धिः । मातृसन्निधौ क्रियमाणां शिशोः प्रार्थनां प्रायः पिता पूरयति हि; किञ्च अम्बासामीप्यात् पालनरूपो मातृगुणः त्वय्यपि संक्रान्तः स्यात् । तादृशो द्रुतं यदि न पासि न रक्षसि, तदा ते त्वं जगतः पिता इति यत् गीतं नाम तद् यातं नष्टमिति जानीहि बुध्यस्व ॥ १३ ॥

मातरि हित्वा बालं कार्याकुलधीः पिता बहिर्याति ।
शिव बत शक्नोषि कथं स्वाङ्गान्मन्मातरं मोक्तुम्[६] ॥ १४ ॥

माता त्वां रक्षतु इति परित्यागो नोचितस्ते पितुरित्याह मातरीति । दृश्यते हि लोके यत् कार्याकुलधीः पिता बालं पुत्रं मातरि हित्वा मातृहस्ते निक्षिप्य गृहाद् बहिर्याति । हे शिव इदं पितृशीलं तु अर्धनारीरूपस्य ते नानुकर्तुं क्षमम् । स्वाङ्गात् मन्मातरं पार्वतीं देवीं मोक्तुं कथं शक्नोषि प्रभवसि । बतेत्यनुतापे । मातृमोक्ष एव न संभवति, कुतो मां तस्यां निक्षिप्य तव बहिस्सञ्चारः ॥ १४ ॥

---

६. मोक्तुं—R.

गुणहीनतां तनूजे मयि दृष्ट्वा किं परित्यजस्येवम्[७] ।
उचितं गुणिनस्त्वेतन्निर्गुणरूपस्य तेऽनुचितम् ॥ १५ ॥

सत्यादिगुणवतो हि पुरुषस्य भगवता संग्रहः क्रियत इति आक्षिप्य समाधत्ते गुणहीनतामिति । किं मयि तनूजे गुणहीनतां दृष्ट्वा मामेवं परित्यजसि ? एतत् एवं परित्यागः गुणिनस्सतः पितुरुचितम्; निर्गुणरूपस्य ते अनुचितम् । निर्गुणेतिश्लेषेण स्वस्य भगवता समानयोगक्षेमता समर्थ्यते भक्तेन । निर्विशिष्ट-ब्रह्मरूपो निर्गुणः शिवः, सत्याद्यभावेन च निर्गुणो भक्तः ॥ १५ ॥

कामक्रोधकटाभ्यां मदजलधारां निरङ्कुशे स्रवति ।

मत्कृतदुष्कृतकरिणि प्रकटा पञ्चास्यता तेऽस्तु ॥ १६ ॥

कामक्रोधेति । कामक्रोधकटाभ्यां तद्रूपोभयकपोलाभ्यां मदजलधारां स्रवति स्रावयति निरंकुशे स्वैरे मत्कृतदुष्कृतकरिणि मदनुष्ठितपापरूपहस्तिनि ते पञ्चास्यता सिंहता प्रकटा अस्तु प्रकटिता भवतु । पञ्चास्यः पञ्चवक्त्रः शिवः, पञ्चास्यः सिंहश्च । उचितं हि सिंहस्य हस्तिन उपमर्दः । काम-क्रोधप्रयुक्तं मे पापं नाशयेति अर्थः ॥ १६ ॥

त्वद्धीनं मां दीनं दृष्ट्वा विषयातिरागसम्बद्धम्[८] ।
धावत्यकीर्तिरेषा नाथः शक्तोऽप्युदासीनः ॥ १७ ॥

त्वद्धीनमिति । त्वया हीनमसनाथमत एव दीनं विषयातिरागसम्बद्धं दुरभिनिविष्टं मां दृष्ट्वा । दर्शनक्रियायाः कर्ता लोकः । 'स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्' इतिवत् । एषा ते अकीर्तिः अयशः धावति प्रचरति । किंरूपा ? अस्य नाथः एतद्रक्षणे शक्तोऽपि उदासीनः उपेक्षणशील इत्येवंरूपा । दृश्यते ह्येतत् लोके यत् सति प्रभावपि पितरि दुश्चरन्तं कृपणां दशामापन्नं वा बालकं दृष्ट्वा जना वदन्ति शक्तोऽपि पिता अस्मिन्नुदास्ते इति ॥ १७ ॥

---

७. परित्यजस्येव—P. ८. संवद्धुम्—M, P. ९. धावन्त्यकीर्ति°—M, P.

अरिभिर्जितैरशक्तैर्विज्ञाप्यं सेवकैः प्रभोर्नीतिः ।
विषयैर्जितोऽस्मि शम्भो तव यच्छ्लाघ्यं तदारचय* ॥ १८ ॥

अरिभिरिति । अरिभिः जितैः अशक्तैः सेवकैः प्रभोः विज्ञाप्यम्, वयं शत्रुभिः पराजिताः न च प्रतिकर्तुं शक्नुमो दुर्बला इति आवेदनीयम्। नीतिः, इति हि नीतिरित्यर्थः । अहं चैवं शत्रुभूतैः विषयैः कामादिभिः जितोऽस्मि । इतस्ते विज्ञापितो मे पराजयः । हे शम्भो ! तव प्रभुभूतस्य यत् श्लाघ्यं श्लाघायोग्यं स्यात् तदारचय कुरु । पाठस्तु आचरयेति दृश्यते कोशत्रयेऽपि । सेवकार्थे उद्युञ्जन् शत्रून्निषूदयेत्यर्थः ॥ १८ ॥

संरक्ष्यते स्वदासैर्यद्यद्वस्तु प्रभोरभीष्टतरम् ।
दासस्तवेष्टकामः कान्तां कनकं कथं त्यजेयमहम् ॥ १९ ॥

कामिनीकाञ्चनादिषु न ते विरक्तिरिति न मां तिरस्कर्तुमर्हसीत्याह— संरक्ष्यत इति । प्रभोः स्वामिनः यद्यद्वस्तु अभीष्टतरं नितरां प्रियं तत्तत् स्वदासैः संरक्ष्यते इति लोकस्वभावः । तव इष्टकामो दासस्सन् अहं कथं कान्तां कनकं च त्यजेयम् । मम कान्ता इष्टा, तव अर्धनारीश्वरस्य तु इष्टतरा; मम कनकमिष्टम्, तव मेरुशरासनस्य कर एव कनकं बिभ्रतः तदिष्टतरम् । त्रिपुरवधे शिवेन कनकगिरेः कोदण्डीकरणं प्रसिद्धमेव ॥१९॥

पापी पापं सुकृती सुकृतं भुंक्ते ममात्र किं नु गतम् ।
इत्यौदास्यमयुक्तं [10]भृत्याकीर्तिः प्रभोरेव ॥ २० ॥

पापीति । पापी पापं भुंक्ते, सुकृती सुकृतं भुंक्ते; अयं च पापी भुंक्तां नाम पापम्; अत्र एतस्मिन् विषये मम किन्नु गतम् इति औदास्यमुपेक्षणमयुक्तम् । ते इति शेषः । मयि दासे दुर्गते तवैव यशः कलंकितं भवति; यतः भृत्याकीर्तिः प्रभोरेव । शंकरप्रभोर्दासः एवं वर्तत इति हि लोको वदिष्यति ॥ २० ॥

---

* ०चरय—M, P, R. १०. भक्त्याकीर्तिः—R.

विकलेऽतिदीनचित्ते विषयाशामात्रधारिणि नितान्तम् ।
मयि रोषतः कियत् ते वद[11] वद शम्भो यशो भावि ॥ २१ ॥

विकल इति । तथा च नाहमिदानीं कामादिपापसक्तः, यतः जरया विकलः, अत एव अतिदीनचित्तश्च । परन्तु वासनाबलात् कामपि विषयेषु आशां केवलं धरामि । एतदवस्थे मयि नितान्तम् अतिमात्रं रोषतः ते कियद् यशो भावि इति हे शम्भो वद वद । 'वद भोः शम्भो यशो भवति' इति वा पाठः ॥ २१ ॥

स्वगृहे भुवनत्रितये योगक्षेमे मुखानि चत्वारि ।
मत्प्रतिवचनं हि विना पञ्चमवदनस्य कुत्र गतिः ॥ २२ ॥

स्वगृह इति । स्वगृहे भुवनत्रितये च एवम् आहत्य स्थलचतुष्टये योगक्षेमे योगक्षेमार्थे चत्वारि ते मुखानि । व्यापृतानि सन्तु इति शेषः । शिष्टस्य पञ्चमवदनस्य मत्प्रतिवचनं विना कुत्र हि गतिः । मत्समाधानमेव ते पञ्चमवदनस्य कर्म, अन्यथा तस्य नैरर्थक्यमेवेति भावः ॥ २२ ॥

तव कोऽहं त्वं मम कः पञ्चस्वेवं विचारयस्वेति ।
ब्रूषे दीनदयाब्धे पञ्चमुखत्वं त्वयि व्यक्तम् ॥ २३ ॥

तवेति । हे दीनदयाब्धे । तव कोऽहम् ? मम त्वं कः ? इति पञ्चसु पञ्चायतसभ्येषु विचारयस्व इति मां ब्रूषे । किं दीनदयाब्धिस्सन् त्वमेवं कस्त्वं मे, को वाहं ते इति विवादविचारं कुरु इति वदसि ? त्वयि एव पञ्चमुखत्वं पञ्चायतन्यायसभासदशपञ्चवक्त्रत्वं व्यक्तम् । अत एव त्वमेव एतद्विवादनिर्णयं कुरु ॥ २३ ॥

याचस्वान्यं धनिनं भविता तव को दिगम्बराल्लाभः ।
मां[12] मा प्रतारयैवं ख्यातः श्रीकण्ठनामासि ॥ २४ ॥

याचस्वेति । अन्यं धनिनं याचस्व । दिगम्बरात् मत् तव को लाभो भविता ? दिशोऽम्बरम् यस्य स दिगम्बरः नग्नरूपः शिवः, दरिद्रश्च । एव-

---

११. वद भो शंभो यशं भवति—R. १२. मा मा प्रता°—R.

मुक्त्वा मां मा प्रतारय । श्रीकण्ठनामा ख्यातोऽसि । श्रीः लक्ष्मीः शोभारूपा विषनीलिमप्रयुक्ता, ऐश्वर्यरूपा च कण्ठे यस्य सः तन्नामा प्रसिद्धस्त्वमसि; न दरिद्रः । श्रीकण्ठ इत्यनेन त्वद्वचनानुपातिनी श्रीः इति ध्वनिः ॥ २४ ॥

वसनाशनप्रदातरि मयि जीवति किं समाकुलस्त्वमिति ।
दोहाय मोच्यमानो वत्सः किं न त्वरामयते ॥ २५ ॥

वसनेति । वसनाशनप्रदातरि ते वस्त्राहारप्रदे मयि प्रभौ जीवति सति, इति एवं त्वं किं समाकुलः व्यग्रः इति मां पृच्छसि चेदेवं वदामि । दोहाय मोच्यमानो वत्सः त्वरां न अयते न गच्छति किम्? आतुरस्य लोकस्य स्वभावोऽयं यत् कामपूरणे सिद्धे सन्निहितेऽपि वा लिप्साप्रयुक्तः संभ्रमो भवत्येव ॥२५॥

पातकराशिरितीदं[१३] त्वयाभिधानं श्रुतं न तद् दृष्टम् ।
तद्दर्शनकुतुकं यदि मां द्रष्टुं किं विलम्बसे देव ॥ २६ ॥

येन केनापि प्रकारेण स्वस्य भगवद्दृष्टिगोचरतामाकांक्षमाण आह पातकेति । पातकराशिः पापसमूह इति इदम् अभिधानमुक्तिः । त्वया श्रुतं, परन्तु तत् न दृष्टम् । न भवता एतावत्कालं राशीभूतः पापो दृष्टस्स्यात् । तद्दर्शनकुतुकं तत्पापभारदिदृक्षा ते यदि, हे देव मां द्रष्टुं किं विलम्बसे ? अहं हि मूर्तः पापभारः ॥ २६ ॥

पातकराशिरसि त्वं पश्याम्यत एव नाहमिति वदसि ।
पातकरूपाज्ञाने शिव तव सर्वज्ञताभङ्गः ॥ २७ ॥

पापदर्शनासंभवे मां पश्येत्युक्तम् । पापिनं नाहं पश्यामीति यदि भगवान् वदेत्तदोत्तरमाह पातकराशिरिति । त्वं पातकराशिरसि । अत एव अहं त्वां न पश्यामीति वदसि ? वदसीति प्रश्नकाकुः । तदा हे शिव पातकरूपाज्ञाने पातकस्य रूपस्य तत् कीदृशं इति अज्ञाने तव सर्वज्ञताभङ्गः । तावता सार्वज्ञ्यं खण्डितमेव भवति असर्वपरामर्शित्वात्तस्य ॥ २७ ॥

---

१३. R gives stzs. 26, 27, 28 above in the order of 27, 28, 26.

पापं पापमितीदं करोषि शिव किं मुधा बुधान् भ्रान्तान् ।
तत्सत्यं चेन्न कथं त्वयानुभूतं न दृष्टं वा ॥ २८ ॥

यत्पापमालम्ब्य स्वस्य शिवेन हानं संभाव्येत, तदेव पुनरपि निराचिकीर्षन्नाह–पापमिति । हे शिव ! इदं पापं पापमिति बुधान् मुधा भ्रान्तान् किं करोषि ? तत्त्वविदामपि बुधानामगोचरस्यास्य पापस्य प्रवादं किं करोषि ? तत्पापं सत्यं चेत् त्वया सर्वज्ञेन तत् कथं न अनुभूतं, न वा दृष्टम् । यतस्तत् न ते गोचरं, ततस्तन्नास्त्येव ॥ २८ ॥

पापे[१४] लोकानुभवः स एव मानं [१५]ममाप्यननुभूते ।
न हि परकीयानुभवः ज्ञातुं शक्यः परेणापि ॥ २९ ॥

मया अननुभूतमदृष्टमपि तत् पापं लोके जनैरनुभूयत एव, लोकप्रमाणेनास्य सत्त्वमिति चेत् प्रत्याह–पाप इति । मया अननुभूतेऽपि पापे लोकानुभवः स एव प्रसिद्धतया वर्तमान एव मानं मम प्रमाणमिति चेत् नैतद्भवितुमर्हति । यतः परेणापि अन्येनापि बुद्धिशक्त्या उत्कृष्टेन सता त्वादृशेनापि न परकीयोऽनुभवः ज्ञातुं शक्यो हि । न हि परानुभवः ते प्रमाणीभवेत्॥२९॥

लोकाभिन्नः सोऽहं वक्तुं वाक्यं ह्युपक्रमस्तव चेत् ।
सिद्धा मनोरथा मे त्वत्तः कस्यापि लोकस्य ॥ ३० ॥

अस्य आक्षेपस्य कोऽप्यन्तरं तदाक्षेपं चाह–लोकाभिन्न इति । न लोकानुभवः परकीयानुभवः; ममैवानुभवो भवितुमर्हति, यतस्सोऽहं लोकाभिन्न एव इति वाक्यमुत्तररूपं वक्तुं तव उपक्रमश्चेत् यद्येवं वक्तुमपक्रमसे, तदा इष्टापत्तिः । त्वत्तः त्वत्सकाशादेव मे मनोरथाः सिद्धाः । कीदृशस्य मे ? लोकस्य कस्यापि अस्य त्वदभिन्नतया त्वयैव अङ्गीकृतस्य लोकस्य कस्यापि अंशभूतस्य मे । अस्मिन् त्वदभिन्ने लोके अहमपि कोऽपि; एवं च अहमपि त्वदभिन्न इति त्वयैव अभ्युपन्ने, हन्त कृतार्थोऽहमिति भावः ॥ ३० ॥

---

१४. पापो—R. १५. ममाप्यनुभूते—R.

अतिवल्गनं ममैतन्मूढत्वं यद्यपि प्रभोः पुरतः ।
दीनः करोमि किं वा मद्विषये को[१६] निवेदयति ॥ ३१ ॥

अतिवल्गनमिति । यद्यपि प्रभोः तव पुरतः अग्रे मम एतद् अतिवल्गनं तर्करूपं मुखरत्वं मूढत्वं मौढ्यम् । प्रभूणां हि पुरो दासानां विनयस्समुदाचारः, न तु वादः । तथापि दीनः कष्टां दशां प्राप्तोऽहं किं करोमि; मम कष्टामवस्थां ते निवेदयितुं मध्यस्थः कोऽपि वर्तेत चेद् ममापि तूष्णींभावः सुकरः, तादृशः पुनर्नास्ति । मद्विषये मामधिकृत्य को निवेदयति । तव सकाश इति शेषः । न कोऽपीति भावः । अतो ममेयं निवेदनप्रगल्भता मर्षणीया ॥ ३१ ॥

लघुरसि किं त्वयि दयया मा[१७] मा मंस्थाः शिवेति सहसा त्वम् ।
भारो भुवोऽस्मि धृत्वा स्वकरे तुलयाशु मां शम्भो ॥ ३२ ॥

लघुरसीति । नितान्तमात्मसंभावनयैवं वदसि, लघुरसि, तत्त्वतस्त्वमतिफल्गुरसि; किं त्वयि दयया ? मम दयां प्रकाशयितुं कस्त्वयि अवकाशः ? इति हे शिव ! त्वं सहसा रभसेन मा मा मंस्थाः । मा मां लघुं गणय । हे शम्भो तत्त्वतः अहं भुवो भारोऽस्मि; न लघुः, किन्तु अतिघनोऽहम् । यदि मम वचने ते न प्रमाणबुद्धिः, त्वं स्वयमेव स्वकरे मां धृत्वा आशु शीघ्रमेव तुलय । अहं किं लघुः उत गुरुः इति परीक्षस्व । धृत्वा स्वकरे इति पदस्वारस्येन यावता भगवता स्वकरेण धृतः तावतैव दत्तालंबनः प्राप्तभगवत्स्पर्शश्चाहं कृतार्थस्स्यामित्यपि ध्वन्यते ॥ ३२ ॥

सस्ये तृणे च वृष्टिं तुल्यां देवः सदैव विदधाति ।
देवो महान् वत त्वं गुरुलघुवार्तां कथं कुरुषे ॥ ३३ ॥

ननु भवामि नाम लघुरेवाहम्; किमेतावता ते दयाया अपात्रतां गन्तुं युक्तमित्याह सस्य इति । सस्ये कलमादिके प्रशस्ते क्षेत्रवर्तिनि बहुकृषिफलभूते । तृणे मार्गे स्वयंरूढे फल्गुनि च । देव इन्द्रः सदैव तुल्यां वृष्टिं विदधाति । तथा उदारो हि सः । त्वं महान् देवः । महादेव इति आख्यातः ।

---

१६. को वा निवे°—R. १७. मां मा—R.

स तु केवलं देवः, त्वं पुनः महादेवः । बत ततोऽपि अधिकमौदार्यं त्वयि उत्प्रेक्ष्यते । तादृशस्त्वं गुरुलघुवार्ताम् अयं गौरवसंपन्नः, अयं तद्धीन इति वार्तां कथं कुरुषे । स विचारस्ते न समुचितः । 'न हि संहरते ज्योत्स्नां चन्द्रश्चण्डालवेश्मनि' ॥ ३३ ॥

दिष्टोद्दिष्टं दास्याम्यन्यन्नेष्टं यदि स्फुटं वाक्यम् ।
दत्ता कथं त्वयासावजरामरता [१८]मृकण्डुजनेः ॥ ३४ ॥

यद्यहं स्वतन्त्रस्तदा एतास्ते: प्रार्थनाः सार्थाः स्युः, कर्म हि फले प्रभवात्, न च मया तन्मर्यादातिक्रमः शक्यः इति न मां प्रतारयितुं ते सुशकमित्याह–दिष्टोद्दिष्टमिति । 'दैवं दिष्टं भागधेयम्' इत्यमरः । यत्स्वपूर्वकर्मार्जितेन दिष्टेन ते उद्दिष्टं फलतया तद् दास्यामि । अन्यत् फलं नेष्टं; तव दातुं नेष्यते । इति यदि ते वाक्यं स्फुटं व्यक्तमुत्तरतया दीयते, अव्यवहारविदम् अयं न्यायः प्रतारयेत्, न तु माम् । यदि तथा वदसि, कथं त्वया मृकण्डुजनेः मार्कण्डेयस्य असौ अजरामरता चिरञ्जीविता दत्ता । पुत्रार्थं तप्यमानस्य मृकण्डुमुनेः प्रसीदता त्वया षोडशवर्षमात्रजीवी बालकोऽनुगृहीतः तावदेवायुर्मार्कण्डेयस्य दिष्टम्, न तु अजरामरता । अतश्चायं कर्मन्यायः वञ्चनैव । यदाह नीलकण्ठदीक्षितोऽपि—

त्रातव्य एष इति चेत्करुणा मयि स्यात्
त्रायस्व किं सुकृतदुष्कृतचिन्तया मे ।
कर्तुं जगत् तिरयितुं च विशृंखलायाः
कर्मानुरोध इति कं प्रति वञ्चनेयम् ॥ (आनन्दसागरस्तवे ४२) ॥३४॥

नादत्तं प्राप्नोतीत्येतद्वाक्यं प्रतारणामात्रम् ।
उपमन्युना कदा वा कस्मै [१९]दुग्धोदधिर्दत्तः ॥ ३५ ॥

तदेव पुनरप्याह दृष्टान्तान्तरेण नादत्तमिति । अदत्तं जीवेन स्वयं दानादिरूपपूर्वकर्मद्वारा अदत्तं न प्राप्नोति इति ते वाक्यं प्रतारणामात्रम्,

---

१८. मृकुण्ड°—M ; मृकुण्डु°—P.

१९. महोदधि°—P. P writes क्षीरो first, cancels it by putting short double parallel lines (=) on it and writes महो after it.

विप्रलंभ एव । यतः स्वशैशवे पानाय पयः प्रार्थयमानेन उपमन्युना महर्षिणा कदा वा कस्मै वा दुग्धोदधिर्दत्तः, यत् त्वं तद्धेतोः दुग्धोदधिमेव व्यतरः । इयमुपमन्योर्दुग्धाब्धिवितरणकथा लिङ्गपुराणे १०७ अध्याये प्रसिद्धा ।। ३५।।

प्रबलतरोन्मादाढ्यं त्वामप्यगणय्य धावमानं च ।
मच्चेतोऽपस्मारं नियमय शम्भो पदाभ्यां ते ।। ३६ ।।

प्रबलतरेति । प्रबलतरोन्मादाढ्यमत्यन्तोन्मत्तमत एव त्वामपि अगणय्य (अगणयित्वा) सर्वनियन्तारमचिन्तयित्वा धावमानमितस्ततो विप्लवमानं च मच्चेतोऽपस्मारं मच्चेत एव अपस्मारः तद्रूपोऽसुरः । तं हे शम्भो ते पदाभ्यां नियमय निगृह्णीष्व । नटराजमूर्तेः शिवस्य भुजङ्गत्रासितकरणेन नर्तने उद्धृतादन्यद्यत्पदं दक्षिणं, तत्पदेन अपस्मारो नाम असुरः अधो अवमर्द्यते । मम चेतश्च अपस्मारतोऽपि दुष्टतरं तवोभाभ्यामपि पादाभ्यां मर्दय ।। ३६ ।।

आशापिशाचिका मां भ्रमयति परितो दशस्वपि दिशासु ।
स्वीये [20]पिशाचवर्गे सेवायै किं[21] न योजयसि ।। ३७ ।।

आशेति । आशैव पिशाचिका मां परितो दशस्वपि दिशासु भ्रमयति भ्रमणशीलं करोति । स्वीये पिशाचवर्गे अनुचरीभूते सेवायै त्वत्परिचरणाय मामपि पिशाचग्रस्तं किं न योजयसि । पिशाचीकृतस्य ममापि ते भूतपतेरुचितः संग्रहः । अथवा ताम् आशानाम्नीं पिशाचिकां स्वीये पिशाचवर्गे सेवायै किं न योजयसि । त्वया स्वसेवायां नियुक्ता सा मद्बाधनाय नावकाशं प्राप्स्यति ।। ३७ ।।

यक्षाधीनां रक्षां त्र्यक्ष निधीनां कुतो नु वा कुरुषे ।
साक्षान्मनुष्यधर्माऽप्यहह[22] कथं नु विस्मृतिर्मम ते ।। ३८ ।।

यक्षाधीनामिति । हे त्र्यक्ष ! त्रिलोचन ! निधीनां शङ्खपद्ममहापद्ममकरकच्छपमुकुन्दकुन्दनीलखर्वाणां नवानां रक्षां यक्षाधीनां कुबेरतदनुचरायत्तां कुतो नु वा कुरुषे ? 'मनुष्यधर्मा धनदः' इत्यमरः । यदि कुबेरः

---

२०. पिशाचिवर्गे—R, P. २१. किं नियोजयसि—M.
२२. °धर्माऽहह— M ; °धर्माह्यहह—R.

मनुष्यधर्मा इति तथा तस्य निधिरक्षणं विहितम्, इतोऽहमस्मि साक्षान्मनुष्य-धर्मा । स तु मनुष्यधर्मा, अहं पुनर्मनुष्य एव, ततश्च तद्विशिष्टः । तादृशस्य मम ते कथं नु विस्मृतिः कथं निधिरक्षणनियोगसमये मां विस्मृतवानसि ॥३८॥

धनदे सखित्वमेतत् तव यत् तत्रास्ति विस्मयः क इव ।
मयि निर्धने तदास्तां त्रिजगति चित्रं कियद्भावि ॥ ३९ ॥

धनद इति । 'कुबेरः त्र्यम्बकसखः' इत्यमरः । धनदे कुबेरे यत् तवैतत् सखित्वं मैत्री तत्र तस्मिन्विषये क इव विस्मयः, आश्चर्यम् ? प्रायो धनिनः सखायः सुलभा एव लोके । तत् सखित्वं तव मयि निर्धने पुरुषे आस्ताम् । यदि तथा स्यात् तत् त्रिजगत्यपि कियच्चित्रं भावि ? कियदाश्चर्यं भविष्यति ॥ ३९ ॥

सखितारूपनिधानं वित्तनिधानं द्विधा धनं तव यत् ।
नैककरे नृपनीतिस्तत्रान्यतरन्निधेहि[२३] मयि ॥ ४० ॥

सखितेति । सखितारूपनिधानं वित्तनिधानमिति तव यद् द्विधा स्थितं धनं, तद् द्विरूपमपि धनमेककरे न नृपनीतिः । न हि नृपा नीतिज्ञाः एककर एव एकस्मिन्नेव पुरुषे सर्वं प्रसादं दर्शयन्ति; कस्मैचित् किमपि यच्छन्ति, अन्यस्मै अन्यदित्येवमेव नृपनीतिः । त्वमपि तां नृपनीतिमनुसृत्य तत्र मैत्री-वित्तयोर्धनद्वययोरन्यतरद् मयि धेहि, अन्यच्च धनद एव आस्ताम् । यदि धनदे सख्यं ते इष्टतरं, तदा निधीन् मयि निक्षिप; यदि निधिनिक्षेपस्य स एव योग्यः, तव सख्यं मह्यं वितीर्यताम् ॥४०॥

पालय वा[२४] मां मा वा मत्तनुभूता तु पञ्चभूततति: ।
पोष्यावश्यं भवता भविता नो चेन्न भूतपतिः ॥ ४१ ॥

पालयेति । मां पालय वा, मा पालय वा । यत्नपूर्वकं मां रक्ष वा मा वा । तव मद्रक्षणार्थव्यवसायाप्रादुर्भावेऽपि कथञ्चिदहं भवता रक्षणीय एव । कथमिति चेदाह—त्वं च नाम्नैव भूतपतिः भूतानां पालकः । अतो भवता

---

२३. °स्तत्रान्यतरं नि°—R ; स्तत्रान्यतरं न्निधेहि—P.

२४. मां वा मा वा—R.

...ARANASI, Acc. No. 1140

मत्तनुभूता मच्छरीरभूता पञ्चभूतततिस्तु पञ्चभूतनिवहस्तु अवश्यं पोष्या। नो चेत्, तथा न पोषयसि चेत्, त्वं न भूतपतिः भविता। वृथा हि ते तन्नाम स्यात् ॥ ४१ ॥

अतिकोमलं मनस्ते मुनिभिर्गीतं कुतोऽधुना कठिनम्।
मन्ये [२५]विषाशनार्थं [२६]कठिनं चेतस्त्वया विहितम् ॥ ४२ ॥

अतिकोमलमिति । ते मनः मुनीभिरतिकोमलं गीतम्। तत्कुतोऽधुना कठिनम्? कठिनीभूतमिति मद्विषये स्फुटम्। कदैवं कठिनीभूतं स्यात्? मन्ये विषाशनार्थं कालकूटप्राशनाय चेतस्त्वया कठिनं विहितम्। न हि सुकुमारमनाः कोऽपि विपाशने प्रवर्तेत ॥ ४२ ॥

मां द्रष्टुमष्टमूर्ते करुणा तेऽद्यापि किं न वोल्लसति।
भिक्षाप्रसङ्गतो वा[२७] कियतां नो यासि सदनानि ॥ ४३ ॥

मामिति। हे अष्टमूर्ते शिव। पञ्चभूतानि सूर्याचन्द्रमसौ यजमानश्चेति एतानि शिवस्य अष्टमूर्तयः। मां द्रष्टुं दर्शनेन अनुग्रहीतुमद्यापि ते करुणा किं वा नोल्लसति। किं तथाविधो दुर्लभः प्रभुरसि, न बहिः कुतोऽपि चरसि, न कमपि पश्यसि? नैव तथासि। त्वं भिक्षाटनरूपः खलु; भिक्षाप्रसङ्गतो कियतां सदनानि वा न यासि। प्रतिसदनं प्रवेशो हि भिक्षुशीलम्। तथा सति ममैकस्यैव कथं ते दर्शनं न भवति? ॥ ४३ ॥

वित्ताधिपः सखा ते भार्या देहे तवान्नपूर्णाख्या।
[२८]ऊरीकृतं न दूरीकुरुषे भिक्षाटनमपीश[२९] ॥ ४४ ॥

नित्यभिक्षुरसि त्वमिति निन्दास्तुतिमाह—वित्ताधिप इति। वित्ताधिपः धनदः ते सखा। अन्नपूर्णाख्या तव भार्या देहे शरीर एव वर्तते। तथा वित्तान्नसंपन्नोऽपि स्वयमीशोऽपि ऊरीकृतमङ्गीकृतं भिक्षाटनमपि अप्रशस्तमपि तत्, हे ईश प्रभो, न दूरीकुरुषे न त्यजसि। अङ्गीकृतमिति तादृशं भिक्षाचरणमपि अजिहासत् त्वं किं मादृशमङ्गीकृतं भक्तं त्यक्ष्यसि इति भावः॥४४॥

---

२५. विषनाशनार्थं—R. २६. कठिणं—R, M.
२७. प्रसङ्गतोद्धा कियंति नो—R. २८. उररी°—R. २९. भिक्षाटण°—R, P.

नाङ्गीकृतो मया त्वं तत एव न दर्शनं मम तवास्ति।
इति नोत्तरं प्रदेयं शिव शिव विश्वेशनामासि ॥ ४५ ॥

अस्तु नाम तथा, त्वां पुनः कदाहमङ्गीकृतवानिति पृच्छसि किम्? ब्रवीम्युत्तरमित्याह—नाङ्गीकृत इति। त्वं मया नाङ्गीकृतः। तत एव हेतोः मम दर्शनं तव नास्ति। इति उत्तरं न प्रदेयम् त्वया। यतः हे शिव शिव! त्वं विश्वेशनामा असि। विश्वमात्रं यदा त्वदीयं, तदा अहमेव त्वया नोरीकृत इति न संभवति ॥ ४५ ॥

यदि देहगेहरूपं ददासि देशाधिकारकार्यं मे।
रसनाख्यलेखपत्रे[30] सुदृढां कुरु नाममुद्रां ते ॥ ४६ ॥

यदीति। मे देहगेहरूपं शरीर-गृह-रूपं देशाधिकारकार्यं तत्प्रदेशेषु तत्स्वामितया तत्कार्यनिर्वाहपर्यवेक्षणादिरूपमधिकारकार्यं यदि ददासि, तदधिकारप्रामाण्याय मम रसनाख्यलेखपत्रे ते नाममुद्रां सुदृढां कुरु। केषुचिद् ग्रामेषु देशमुखादि-अधिकारं कस्मैचिद् प्रयच्छन् राजा स्वनाम-मुद्राङ्कणपूर्वं तस्मै अधिकारलेख्यपत्रं ददाति, तत्पत्रप्रामाण्यबलाच्च स देशा-धिकारी स्वकार्यं निर्वहति। एवं च मम देहगेहप्रदेशाधिकारं प्रयच्छता त्वया मदीयरसनारूपलेख्यपत्रे मदधिकारनिर्वाहसौकर्याय त्वन्नाममुद्रा अवश्यं देया। त्वन्नामबलादेव निर्वहामि न त्वन्यथा प्रभविष्यामीति भावः ॥ ४६ ॥

रसनोक्तं कुरु सर्वं शिव तव नामाधिमुद्रितास्तीयम्।
गणयसि मुद्रां न हि चेत् प्रभुतोच्छिन्ना[31] तवैव स्यात् ॥४७॥

रसनायां मे मुद्रां दत्वा मामधिकारीकृतवतस्ते मदीयरसनाधीनता प्राप्ते-त्याह रसनोक्तमिति। हे शिव! मद्रसनोक्तं सर्वं कुरु, यतः इयं मे रसना तव नामाधिमुद्रिता। भवतः प्राप्ताधिकारा सा कार्यकरी यद्यद्वक्ति तत्तद् बाढं बाढमित्येव त्वयाभ्युपगमपूर्वमनुष्ठेयम्। तथा न करोषि चेद्, रसनादत्ता मुद्रा न गणिता स्यात्; मुद्रां त्वदाज्ञारूपां न गणयसि चेत् तवैव प्रभुता उच्छिन्ना स्यात्। एवं च त्वन्मुद्रासत्कारायैव त्वया मद्वचनानुष्ठान-मवश्यमापतितम् ॥ ४७ ॥

---

३०. °लेख्यपत्रे—R. ३१. प्रभुता छिन्ना—R. ३२. तद्दारिद्र्ये भै°—R.

अत्याटिनं करालं भिक्षायुक्तं कपालशूलकरम् ।
[32]मद्दारिद्र्यं भैरवरूपं कुरु चार्धचन्द्रयुतम् ॥ ४८ ॥

अत्याटिनमिति । अत्याटिनं अतिभ्रमणशीलं करालं घोरं भिक्षायुक्तं भैक्षयाढ्योपेतं कपालशूलकरं परमेश्वरपक्षे कपालः शूलश्च करे यस्य सः, तमिति । दारिद्र्यपक्षे कपालस्य शूलः वेदना, तं करोति, तामिति । एवं भैरवरूपं भैरवस्य तव रूपमिव रूपं यस्य तम्, भैरवं भयङ्करं रूपं यस्य तमिति च । मद्दारिद्र्यं अर्धचन्द्रयुतं कुरु भैरवरूपसंपूर्त्यै चन्द्रशेखरं च विधेहि । अर्धचन्द्र इति निष्कासनकर्मणि साधोर्हस्ताभिनयस्य नाम । तद्युतं कुरु, निष्कासयेति भावः ॥ ४८ ॥

[33]दारिद्र्यचण्डरश्मौ प्रतपति केदारवच्च मयि शुष्के ।
[34]जलधरतायां सत्यां त्वयि शिव नाद्यापि समुपैषि ॥ ४९ ॥

दारिद्र्येति । दारिद्र्यचण्डरश्मौ निर्धनतासूर्ये प्रतपति मयि च केदारवत्क्षेत्रवच्च शुष्के सति, त्वयि च जलधरतायां मेघतायां सत्यां, हे शिव, नाद्यापि समुपैषि । मामुदकवर्षैः सम्यगार्द्रीकर्तुं प्लावयितुं चेति शेषः । 'जलधरता या सत्यं तव शिव नाद्यापि समुपैति' इति वा पाठः । या जलधरता तव सत्यं वर्तते सा नाद्यापि मदार्द्रीकरणाय समुपैतीत्यर्थः । जलधरो मेघः, शिवश्च गंगाधरत्वाज्जलधरः ॥ ४९ ॥

दारिद्र्याख्यमनोभूः क्लीबं चेतोऽपि मोहयत्यनिशम् ।
एनं लीनं कर्तुं धन्यः [35]कोऽन्यस्त्वदन्योऽस्ति ॥ ५० ॥

दारिद्र्येति । दारिद्र्याख्यमनोभूः दारिद्र्याभिधमन्मथः क्लीबमपि चेतोऽनिशं मोहयति । एनं दारिद्र्यमन्मथं लीनं कर्तुं नाशयितुं त्वदन्यः त्वद्व्यतिरिक्तो धन्यः कोऽन्यो अस्ति । न कोऽपि इत्यर्थः । यतस्त्वं मन्मथदाही ततस्त्वदन्यो कोऽत्रेष्टे ॥ ५० ॥

---

३३. दारिद्र्ये चण्ड°—R.
३४. जलधरता या सत्यं तव शिव नाद्यापि समुपैति—R.
३५. कोन्यः स्त्वद°—M, P ; कोन्यः स्वद°—R.

भालानलाक्षियुक्तस्त्रिजगति नान्यो मदन्य इति ।
गर्वं मा वह यावद्दारिद्र्याग्निः कपाले मे ॥ ५१ ॥

भालानलेति । भाले अनलाक्ष्णा वह्निरूपेण नेत्रेण युक्तः मदन्यः मद्भिन्नः अन्यः त्रिजगति न इति नास्तीति मा गर्वमुद्वह, यतोऽहं ते प्रतिद्वन्द्वी प्राप्तः । यावत् मे कपाले दारिद्र्याग्निः अस्तीति शेषः ॥ ५१ ॥

चेतः कुरु मा कलहं तव वैक्लव्येऽपि शम्भुना प्रभुणा ।
न वदति यद्यपि भर्ता तवोपकर्ता स एवास्ति ॥ ५२ ॥

चेत इति । हे चेतः ! तव वैक्लव्येऽपि व्याकुलतायामपि प्रभुणा शम्भुना त्वं मा कलहं कुरु । भर्ता यद्यपि न वदति, एतत्ते करोमि इत्यादिकं न वदति, तथापि स एव तव उपकर्ता अस्ति । नान्यतस्त उपकारो भावी, स च अवश्यमुपकरिष्यत्येव ॥ ५२ ॥

अयि चित्त वित्तलेशे सहजप्रेम्णा कियन्नु [३६]लुब्धमसि ।
न तथापि तद्वियोगः केवलमास्ते शिवेनापि ॥ ५३ ॥

अयीति । अयि चित्त । वित्तलेशे सहजप्रेम्णा कियन्नु लुब्धमसि ? कियदिव लोभि अतः कृच्छ्रगतं च असि ? तथापि न केवलं तद्वियोगः वित्तलेशवियोगः अपि तु शिवेनापि वियोगः अस्ति । न केवलं वित्तं न प्राप्तम् अपि तु शिवोऽपि न प्राप्तः । वित्ते यावत् सहजं प्रेम यावांश्च लोभः कृतः, तस्य लेशोऽपि यदि शिवे कृतः, त्वया एतावता शिवो लब्धः स्यादिति भावः॥५३॥

चेतःकीर विहारं परिहर परितः स्वयं प्रयत्नेन ।
अत्तुं कालविडालो धावति [३७]शिवपञ्जरं प्रविश ॥ ५४ ॥

चेत इति । हे चेतःकीर मानसरूपशुक ! स्वयं रक्षकजनहीनं परितः विहारं प्रयत्नेन परिहर । कालविडालः मृत्युरूपो मार्जारः अत्तुं त्वां भक्षयितुं धावति । शिवपञ्जरं प्रविश । तत्रस्थं त्वां स कालविडालो न किमपि कर्तुं पारयति ॥ ५४ ॥

---

३६. कियन्नु लब्ध°—M ; कियन्न लुब्ध°—P.
३७. °पञ्जरं सदा प्रविश—R.

चेतःसदागते त्वं प्रत्याशावात्ययानुगतमूर्तिः ।
मा वह विषयारण्ये लीनो भव सच्चिदाकाशे ॥ ५५ ॥

चेत इति । हे चेतस्सदागते चेतोमारुत । प्रत्याशा एव वात्या तया अनुगता मूर्तिः यस्य सः । वात्या प्रबला वातसंहतिः । तादृशस्त्वं विषयारण्ये मा वह; आशावात्याशून्ये सच्चिदाकाशे सच्चिदम्बररूपे भगवति लीनो भव, तत्र शान्तिमुपयाहि ॥ ५५ ॥

चेतः शृणु मद्वचनं मा कुरु रचनं मनोरथानां त्वम् ।
शरणं प्रयाहि शर्वं सर्वं[३८] सकृदेव सोऽर्पयिता ॥ ५६ ॥

चेत इति । हे चेतः । मद्वचनं शृणु । मनोरथानां रचनं त्वं मा कुरु । शर्वं शरणं प्रयाहि । सः सकृदेव एकपद एव सर्वं तत्तन्मनोरथविषयीभूतं सर्वं अर्पयिता अर्पयिष्यति । तवेति शेषः ॥ ५६ ॥

भ्रातः शृणु मच्चेतो मा नय कालं त्वितस्ततो भ्रमणात् ।
कालक्षेपेच्छा चेदवलम्बय कालकालं त्वम् ॥ ५७ ॥

भ्रात इति । हे भ्रातो मच्चेतः । शृणु अवधेहि । इतस्ततो भ्रमणात् भ्रमणद्वारा कालं मा नय । कालक्षेपेच्छा कालं यापयितुमिच्छा चेत्, त्वं कालकालं यमनियामकं शिवमवलम्बय । तत्तद्भोगेप्सया, इतस्ततो भ्रमन् त्वं कालेन याप्यसे; यदि तत्त्वतस्तव कालमेव क्षपयितुमिच्छा, तत्र कालकाला-श्रयणमेव परमोपायः ॥ ५७ ॥

अयि चेतोविहग[३९] त्वं विषयारण्ये भ्रमन्नसि श्रान्तः ।
विश्रामकामना चेच्छिवकल्परुहे चिरं तिष्ठ ॥ ५८ ॥

अयि चेत इति । अयि चेतोविहग ! विषयारण्ये भ्रमन् श्रान्तोऽसि । ते विश्रामकामना चेत् शिवकल्परुहे शिवरूपकल्पपादपे चिरं तिष्ठ । स हि ते निकामं विषयाटवीपर्यटनक्लान्तस्य परां विश्रान्तिं प्रदास्यति ॥ ५८ ॥

---

३८. R om. सर्वं.   ३९. °विहगस्त्वं—P.

चेतोमधुकर दूरं दूरं कमलाशया[४०] कुतो यासि।
ध्यानादनुपदमेतच्छिवपदकमलं तवायाति ॥ ५९ ॥

चेत इति। हे चेतोमधुकर चेतोभृङ्ग! कमलाशया सरोजाशया धनाशया च। कमलं सरोजम्, कमला लक्ष्मीः। दूरं दूरमतिदूरं कुतः कस्मात् कारणाद् यासि। ध्यानाद् ध्यानमात्रादेव शिवपदकमलं तव आयाति। ध्यानमेव पर्याप्तं, न तु दूरदूरयानमपेक्षितम्; तव न गमनप्रयासः, तदेव त्वामायाति इति व्यतिरेकः ॥ ५९ ॥

चेतश्चकोर तापं भूपं संसेव्य किं वृथा यासि।
यदि चन्द्रिकाभिलाषो निकषा भव चन्द्रचूडस्य ॥ ६० ॥

चेत इति। हे चेतश्चकोर! भूपम् भूपतिं उदरपूर्त्यै संसेव्य तदप्राप्त्या किं वृथा तापं यासि। यदि चन्द्रिकाभिलाषः चन्द्रचूडस्य निकषा समीपे भव। चकोरश्चन्द्रिकया हि वर्तयति। हे चेतश्चकोर तवोचितां वृत्तिं चन्द्रिकारूपां चन्द्रचूडो दास्यति, न तु भूपः ॥ ६० ॥

चेतःकुरङ्ग गीते रक्तं चेतस्तवास्त्वनवगीते[४१]।
भगवद्गीतागीते नगजाकलिते[४२] तदारचय ॥ ६१ ॥

चेत इति। हे चेतःकुरङ्ग हे चित्तमृग! अनवगीते अनिन्दिते गीते गानवस्तुनि ते चेतो रक्तमस्तु। तत् चेतः भगवद्गीतागीते भगवद्गीतासु गीते नगजाकलिते पार्वतीस्वीकृते शिवे आरचय कुरु। कुरङ्गस्य गीतेऽभिनिवेशः प्रसिद्धः। शिववादिभिः अप्पय्यदीक्षितादिभिः भगवद्गीताप्रतिपाद्यपुरुषस्य शिवत्वमुक्तम्। "अपि च 'गीतासु वासुदेवेन यत्पार्थाय प्रदर्शितम्। रूपं निर्वर्णितं तच्च शैवमेव प्रतीयते॥' 'दर्शयामास पार्थाय परमं रूपमैश्वरम्।' इति तत्रैव तस्यैश्वरत्वकीर्तनाद्" इत्यादिकेन सन्दर्भेण शिवतत्त्वविवेके आनन्दलहरीतद्व्याख्ययोश्च, 'गीतासु गूढमुदितं भवतः परत्वम्' इति भारततात्पर्यसंग्रहे च प्रपञ्चितोऽयमर्थः श्रीमदप्पय्यदीक्षितैः ॥ ६१ ॥

---

४०. कमलाशयान् कुतो—P.
चेतःस्तवास्ति नवगीते—P.
४१. चेतस्त्वयास्त्यनवगीते—R;
४२. गिरिजा°—P.

रसने निन्दाव्यसने पैशुन्ये वा न वाग्मितां याहि ।
त्रिपुरारिनाममालां जितकालां शीलयाशु त्वम् ॥ ६२ ॥

'चेतः कुरु मा कलहम्' (५२) इत्यारभ्य 'चेतः कुरङ्ग' (६१) इत्यन्तम् अन्तरिन्द्रियस्य मनसः संबुद्धिः । इतः परं कर्मेन्द्रियाणां प्रत्येकं संबोधनम् । तत्र प्रथमं रसनेन्द्रियमाह रसन इति । हे रसने जिह्वे ! निन्दाव्यसने परदूषणदुरभिनिवेशे पैशुन्ये वा रहोमित्रभेदिनि अपवादभाषणे वा वाग्मितां वाक्प्रगल्भतां न याहि । जितकालां जितः कालः मृत्युः यया सा, ताम् । जितकालामित्यनेन उत्तमकालक्षेपोपायभूतामित्यप्यर्थः । तादृशीं त्रिपुरारेः नाममालां 'शम्भो शंकर' इत्यादिकां नामावलिं त्वमाशु शीलय । परनिन्दाव्यसनेन मा मृत्युमुखं प्रविश; शिवनामान्युच्चार्य मृत्युं जयेति भावः ॥ ६२ ॥

रसने रसान् समस्तान् रसयित्वा तद्विवेचने कुशला ।
असि तद्वदाशु[43] पश्येः शिवनाम्नः को रसोऽयमिति ॥ ६३ ॥

यथा च निन्दितभाषणादिषु जिह्वाया रुचिः तथा मधुरादिभोजनरसेषु च तस्या रुचिः । तद्रुचिं विषयीकृत्य पुना रसनां संबोधयति रसन इति । हे रसने ! समस्तान् षडपि केवलान् मिश्रभेदांश्च रसान् आम्लमधुरादीन् रसयित्वा तद्विवेचने कुशला, इदं मधुरम् इत्यादि वक्तुं समर्था असि । तद्वत् तथा शिवनाम्नः शिवनामरूपभोज्यवस्तुनः अयं रसः इति आशु पश्येः । किं भोज्यान्तरवदयमुत ततोऽपि आस्वाद्य इति भवत्येव पश्येत् ॥ ६३ ॥

शिवनामसल्लतां[44] त्वं रसनापल्लव कदापि न विहातुम् ।
यदि वाञ्छसे[45] तदा मा कोमलतां सर्वथा जहिहि ॥ ६४ ॥

शिवनामेति । हे रसनापल्लव रसनाकिसलय ! यदि शिवनामसल्लतां शिवनामरूपां सतीं शोभनां वल्लीं कदापि विहातुम् न वाञ्छसे यदि । वाञ्छसे इति चिन्त्यमात्मनेपदम् । 'वाञ्छसि' इति चोपलभ्यमाने साधुपाठे पादे

४३. असि तच्चैदाशु [Probably for चेत्तदाशु] पश्य शिवनाम्न्यत्र को—R. ४४. °सत्कृतां—M. ४५. वांछसि—P.

मात्रैकन्यूनतापत्तिः । 'यदि वाञ्छास्ति तदा मा' इति स्यात्तृतीयपादपाठः । तदा कोमलतां सर्वथा मा जहिहि मा त्यज । यावच्च त्वं कोमलं भवसि, तावच्च त्वयि शिवनामवासो नियतं भविष्यति ॥ ६४ ॥

हालाहलस्य तापः शशिना गङ्गाम्बुना न यदि याति ।
शिव मा गृहाण भुजगान् मद्रसनापल्लवे स्वपिहि ॥ ६५ ॥

हालाहलस्येति । यदि हालाहलस्य त्वया भुक्तस्य तापः शैत्योपायभूतेन शशिना गङ्गाम्बुना च न याति, स कथं विषवासभूतैः भुजगैः शाम्येत् । तद् भुजगान् मा गृहाण । शीतले मद्रसनापल्लवे स्वपिहि निद्रां याहि । पल्लवसंस्तरशयनं हि प्रसिद्धः शैत्योपचारः ॥ ६५ ॥

लोचन कोऽभूल्लाभः सर्वानेव द्विलोचनान् वीक्ष्य ।
दृष्टस्त्रिलोचनश्चेत् सफलं जन्मैव ते भावि ॥ ६६ ॥

इतः परं त्रिभिः श्लोकैः दर्शनेन्द्रियप्रतिबोधः । लोचनेति । हे लोचन ! सर्वान् द्विलोचनानेव केवलं मनुष्यान् वीक्ष्य को लाभोऽभूत् । तव इति शेषः । न कोऽपीत्यर्थः । मनुष्याधिकः त्रिलोचनः शिवः दृष्टश्चेत् , ते जन्मैव सफलं भावि ॥ ६६ ॥

नालोकते यदि त्वां [४६]मन्नेत्रं कृष्णमस्तु मुखमस्य ।
स्वां त्र्यक्ष दक्षतां मे दर्शय नयनावलोकस्य ॥ ६७ ॥

नालोकत इति । यदि मन्नेत्रं त्वां नालोकते, अस्य नेत्रस्य मुखं तारकारूपं कृष्णं तमोरूपमस्तु । मन्नेत्रमध्यं तमोरूपमतस्त्वदालोकनाक्षमम् । हे त्र्यक्ष प्रकाशरूपसूर्यचन्द्राग्निमयनेत्रत्रययुक्त ! त्वं नयनावलोकस्य स्वां दक्षतां स्वं दर्शनसामर्थ्यं मे दर्शय । यद्यप्यहं त्वां न द्रष्टुं शक्नोमि तथापि न ते मद्दर्शनं दुष्करम् ॥ ६७ ॥

---

४६. यन्नत्र [Probably for यन्नेत्रं]—R.

त्वं लोचनान्धकारे द्रष्टुं[४७] वस्त्वन्धकारभिन्नं किम् ।
वाञ्छस्यनेन सङ्गेऽदृश्यमपीदं त्वया दृश्यम् ।। ६८ ।।

त्वमिति । हे लोचन ! अन्धकारे तमसि अन्धकारभिन्नं वस्तु तेजः, ज्ञानमिति यावत् ; त्वं द्रष्टुं वाञ्छसि किम् ? नैतत् शक्यम् । अनेन शिवेन ज्ञानतेजोरूपेण सङ्गे अदृश्यमपि साक्षात्कर्तुमशक्यमपि इदम् अन्धकारभिन्नं वस्तु ज्ञानम् दृश्यं भवति । अज्ञानाश्रये कदापि न ते ज्ञानप्राप्तिः, ज्ञानप्राप्तेश्च शिवोपासनमवश्यमित्युक्तं भवति ।। ६८ ।।

श्रवण सखे शृणु मे[४८] त्वं यद्यपि जातो बहुश्रुतोऽस्ति भवान् ।
शब्दातीतं श्रोतुं शिवमन्त्रात् कोऽपरो मन्त्रः ।। ६९ ।।

एकेन श्रवणेन्द्रियमुपदिशति श्रवण इति । हे सखे श्रवण ! यद्यपि भवान् बहुश्रुतो जातोऽस्ति, तथापि मे शृणु । जात इत्यादि पुंलिंगशब्दानां सखिपदे अन्वयो द्रष्टव्यः । ममेदमवधारय । शब्दातीतं शब्दमार्गमतिक्रम्य वर्तमानं परं तत्त्वं शिवस्वरूपं श्रोतुं नादरूपेण भासमानं श्रोतुं शिवमन्त्रात् 'नमः शिवाय' इति रूपात् कोऽपरो मन्त्रः । तेऽस्तीति शेषः । न हि बहुश्रुतवतोऽपि श्रवणेन्द्रियस्य स्वभावोल्लङ्घनेन स्वगुणभूतात् शब्दादेव दविष्ठं वस्तु श्रोतुं शक्यम् । तदपि अनुभवविषयं स्याद् यदि शिवमन्त्रः साध्यत इत्युक्तं भवति ।। ६९ ।।

घ्राण[४९] प्राणसखो मे भवसि भवान् पार्थिवोऽस्ति किमु वान्यत् ।
शिवपदकमलामोदे मोदं गन्तासि यदि शीघ्रम् ।। ७० ।।

घ्राणेति । घ्राणेन्द्रियमाह । हे घ्राण ! त्वं प्राणसखो मे भवसि । उच्छ्वासनिःश्वासमार्गभूतनासिकाग्रवृत्तेः अस्मिन्निन्द्रिये प्राणसखत्वम् । यदि शिवपदकमलामोदे परिमलेषु परमप्रकृष्टे शिवपादसरोजपरिमले मोदमानन्दं शीघ्रं गन्तासि गमिष्यसि, तदा भवान् पार्थिवोऽस्ति, किमु वान्यत् । नूनं त्वं भाग्यभाङ् महाराज एवासि, किमन्यत् । पृथिव्या अयमिति पार्थिवो

---

४७. दृष्टं वस्त्वंधकारिभिन्नां किं—R. द्रष्टुं वस्त्वंधकारिं किं—M.P.
४८. P om. मे. ४९. प्राण प्रा°—R.

घ्राणः घ्राणेन्द्रियम् । गन्धवत्त्वस्य पृथ्व्या लक्षणत्वात् घ्राणेन्द्रियस्य स्वभावत एव पार्थिवत्वम् ॥ ७० ॥

रामास्पर्शसुखे ते नितरां भो विग्रहाग्रहोऽस्ति यदि ।
आलिङ्ग्यार्धरामं रामाऽभिन्नः स्वयं भवसि ॥ ७१ ॥

रामेत्यारभ्य द्वाभ्यां श्लोकाभ्यां स्पर्शेन्द्रियं बोधयति । भो विग्रह ! स्पर्शेन्द्रियाधिष्ठानभूतशरीर रामास्पर्शसुखे स्त्रीस्पर्शसुखे ते यदि नितरामाग्रहोऽस्ति तदा अर्धरामम् अर्धनारीश्वरमालिङ्ग्य आलिङ्ग तन्मयतां गच्छ । ततश्च स्वयं रामाभिन्नो भवसि । शिवसारूप्यलाभात् त्वमपि रामाभिन्नरूपो भविष्यसि ॥ ७१ ॥

विग्रह विग्रहमेव त्वं कुरु देवेन नाऽमुना सख्यम् ।
रुचिरप्यस्मिन् शम्भौ जनयत्यरुचिं स्वदेहेऽपि ॥ ७२ ॥

विग्रहेति । हे विग्रह मच्छरीर ! देवेन शिवेन सह विग्रहं कलहमेव कुरु । अमुना सह न सख्यं कुरु । यतः अस्मिन् शम्भौ रुचिरपि जनस्य स्वदेहेऽपि अरुचिं विरक्तिं जनयति । शिवानुरागात् ते स्वस्मिन् विरागो जायेत । को हि नाम सचेतनः स्वप्रतिकूलीभूतफलप्रदमभिनिवेशमाद्रियेत । वस्तुत उपदेशस्तु 'कृमिरोगादिदुष्टे मर्त्ये देहे जुगुप्सां या पोषयति, तां शिवे भक्तिं परिचिनु' इति । मा कुर्विति निषेधात् 'अत्ता एत्थ णिमज्जइ' (गाथा स. ७·६७) इतिवत् विधिरूपोऽभिप्रायः ॥ ७२ ॥

संमीलय[51]याशु रामां त्वद्वामाङ्गान्मया समं शम्भो ।
जातं ममापि यस्माद् दुःखेनार्धं शरीरमिदम् ॥ ७३ ॥

संमीलयेति । मया समं यथा स्यात् तथा हे शंभो त्वद्वामाङ्गात् त्वच्छरीरवामभागाद् रामां पत्नीम् आशु संमीलय तिरस्कुरु । कथं तत् त्वया समं स्यादिति चेदाह यस्मात् कारणात् दुःखेन ममापि इदं शरीरमर्धं जातम् । पार्वत्यभावे शिवस्यार्धावशिष्टशरीरत्वात् साम्यम् ॥ ७३ ॥

---

५०. मालिंग तयाः सार्द्धं for आलिंगयार्धरामं—R; भवानस्ति for भवसि–R, ५१. संलीनयाशु—R.

अपराधकारिणं मां मत्वा शम्भो यदि त्यजस्येवम्[५२] ।
व्याधः शिरसि पदं ते दत्वा न जगाम किं मुक्तिम् ॥ ७४ ॥

अपराधकारिणमिति । हे शम्भो ! मामपराधकारिणं तवापचारं कृतवन्तं मत्वा यद्येवं त्यजसि, व्याधः ते शिरसि पदं दत्वा मुक्तिं किं न जगाम ? शिरसि पादकरणादधिकोऽप्यपराधोऽस्ति वा ? तथापि कण्णप्पनामा व्याधभक्तः कालहस्तिक्षेत्रे प्रत्यहं मृगयान्ते त्वल्लिङ्गमेत्य पूर्वेद्युः प्रक्षिप्तपुष्पाणि पदैव निरस्यन् नूतनानि कुसुमानि क्षिपंश्च त्वया न किं मुक्तिं प्रापितः । प्रसिद्धा चेयं कथा उपमन्युप्रोक्तशिवभक्तविलासादिप्रतिपादितासु दाक्षिणदेशीयत्रिषष्टिशिवभक्तकथासु ॥ ७४ ॥

पार्थः कलहं धनुषा ताडनमपि मूर्ध्नि ते न किं कृतवान् ।
तत्रापि ते प्रसन्नं चेतः सन्ने मयि कुतो न ॥ ७५ ॥

पार्थ इति । पार्थः अर्जुनः कलहं त्वया सह युद्धं, ते मूर्ध्नि युद्धमध्ये धनुषा ताडनमपि किं न कृतवान् । तत्रापि तथा युद्धताडनादिभिरपराधिनि तस्मिन्नपि ते चेतः प्रसन्नम् पाशुपतास्त्रप्रदानेन । सन्ने न केवलं अनभिद्रुह्यति, परं स्वदुःखैः खिन्ने च मयि कुतस्ते चेतो न प्रसन्नम् ? कौरवजयार्थं दिव्यास्त्रलाभाय अर्जुनस्तपश्चचार; किरातवेषेण वराहमनुधावता शिवेन स युध्यमानः अन्ते तत्प्रसादेन पाशुपतास्त्रं लेभे इति प्रसिद्धैव कथा भारते किरातार्जुनीयकाव्ये च । मध्येयुद्धं धनुषा शिवशिरस्ताडनं च भारते वने कैराते ३९ अध्याये उक्तम् 'प्रगृह्याथ धनुष्कोट्या ज्यापाशेनावकृष्य च । मुष्टिभिश्चापि हतवान् वज्रकल्पैर्महाद्युतिः ॥' इति । 'गाण्डीवेन किरीटिना सरभसं चूडान्तरे ताडितः' इति च केनापि कविनोक्तम् । शिवलिङ्गबिम्बेषु मूर्ध्नि दृश्यमाना रेखा च 'पार्थप्रहार' इत्युच्यते ॥ ७५ ॥

---

५२. त्यजस्येव—M.

त्वयि तुष्टे रुष्टे वा शिव का चिन्ता स्वदुःखभङ्गे मे।
उष्णं* वानुष्णं वा[५३] शमयति सलिलं सदैवाग्निम् ॥ ७६ ॥

त्वयीति। हे शिव ! त्वयि तुष्टे रुष्टे सति वा मे स्वदुःखभङ्गे दुःखनाशविषये का चिन्ता ? कापि चिन्ता नास्त्येव। उष्णं वा अनुष्णं शीतं वा सलिलं सदैव अग्निं शमयति। यथोक्तमन्यत्र 'क्रोधोऽपि देवस्य वरेण तुल्यः' इति ॥ ७६ ॥

दोषाकरे द्विजिह्वे रतिमतिशयितां करोषि यदि शम्भो।
अहमस्मि तथा वितथा कुरुषे[५४]मां दृक्पथातीतम् ॥ ७७ ॥

दोषाकर इति। दोषाकरे चन्द्रे दोषाणामाकरे च। द्विजिह्वे सर्पे खले च। अतिशयितां रतिं महतीं प्रीतिं तदाभरणीकरणपर्यवसायिनीं यदि करोषि, अहं तथा अस्मि दोषाणामाकरः खलश्चास्मि। मां तु वितथा वृथा दृक्पथातीतं अदर्शनयोग्यं कुरुषे ॥ ७७ ॥

चेतो मदीयमेतत्सेवाचौर्ये यदि प्रसक्तं ते।
दण्डय नितरां शम्भो सर्वस्वं लुण्ठयैतस्य ॥ ७८ ॥

चेत इति। यदि मदीयमेतत् चेतः ते सेवाचौर्ये सेवायाः अकरणेन तद्वञ्चने प्रसक्तम्, हे शम्भो एतच्चेतो नितरां साधु दण्डय। दण्डप्रकारमाह—एतस्य चेतसः सर्वं लुण्ठय, त्वं चोरय। तत् निकामं रिक्तीकुरु। चेतसस्तत्तद्विषयान्तरसत्त्वादेव भगवत्सेवासक्तिर्न जायते। ततश्च 'यस्यानुग्रहमिच्छामि तस्य वित्तं हराम्यहम्' इति उक्तरीत्या मच्चेतसः सर्वं विषयं मुषाणेति भावः। हर इति नाम्नश्चेदं सदृशं स्यात् ॥ ७८ ॥

---

* Cf. स्निग्धमालपसि रूक्षमेव वा
त्वत्कथैव सखि मे रसायनम्।
शीतलं सलिलमुष्णमेव वा
पावकं हि शमयेन्न संशयः॥ विद्याकरसहस्रकम् ९८३
(Edited by Umesh Mishra, Allahabad University Publications, Sanskrit Series–Vol. II, Allahahad, 1942.)

५३. P om. वा. ५४. मा—R.

सदनं प्रत्यागमनं कुशलप्रश्नोक्तिरस्तु दूरतरे ।
आलोकनेऽपि शम्भो यदि सन्देहः कथं जीवे ॥ ७९ ॥

सदनमिति । मैत्रीमर्यादया भगवन्तं पृच्छति । सदनं प्रत्यागमनम् मम गृहं प्रति आगमनम् । कुशलप्रश्नोक्तिः किमहं कुशली वर्ते इति प्रश्नवचश्च दूरतरे अस्तु सर्वथा मास्तु नाम । यदि आलोकनेऽपि परस्परसन्दर्शनविषयेऽपि सन्देहः संशयः भवेत्, हे शम्भो कथं जीवे जीवामि ॥ ७९ ॥

आवाहितः स्वभक्तैस्त्वरयैवायासि[55] सर्वपाषाणे ।
चित्तोपले मदीये हे शिव वस्तुं कुतोऽस्यलसः ॥ ८० ॥

आवाहित इति । स्वभक्तैरावाहितः सर्वपाषाणे शिलामयबिम्बे सर्वस्मिन्नपि त्वरयैव आयासि । तादृशस्सन् मदीये चित्तोपले चित्तमेव उपलः शिला तत्र वस्तुं हे शिव कुतोऽलसोऽसि । 'ओः शम्भोः पलो बोधकः' (अमरव्याख्यासुधा २. ३. ४) इति उपलशब्दनिरुक्तेः मच्चित्तोपले वासस्ते आवश्यकतया आपतित एव । न च मच्चित्तशिला बिम्बीभूतशिलान्तरेभ्यः कठिनतरा, यतः सैव न वासयोग्या ते ॥ ८० ॥

वृषभे पशौ दया ते कियती शम्भो पशुप्रियोऽसि यदि ।
विषयविषाशनतोऽहं पशुरेवास्मीति मां पाहि ॥ ८१ ॥

वृषभ इति । हे शम्भो ! पशौ वृषभे स्ववाहनभूते ते कियती दया । स हि त्वया सम्यग्रक्ष्यते । यदि एवं पशुप्रियोऽसि अहं पशुरेवास्मीति कृत्वा मां विषयविषाशनतः विषयरूपविषदुष्टवस्तुभुक्तेः पाहि । त्वं पशुपतिः, पशुं च सदा रक्षसि, वयं च पशवः सविषाविषविवेकरहिताः विषयाख्यदुष्टाशनाद् यथा न विपद्यामहे, तथा रक्ष ॥ ८१ ॥

---

५५. °स्त्वरयैवासि—R.

त्वयि दृष्ट्वौदासीन्यं तत्स्पर्धातो विवर्धते दैन्यम् ।
मयि तज्जेतुं त्वरया प्रेषय निकटेऽस्ति यत् सैन्यम् ॥ ८२ ॥

त्वयीति । त्वयि मद्विषयम् औदासीन्यं दृष्ट्वा तत्स्पर्धातः तत्संघर्षादिव मम दैन्यं च विवर्धते । यथा यथा त्वमुदासीनः तथा तथाहं दीनः । मयि वर्तमानं तद् दैन्यं जेतुं यत्सैन्यं ते निकटेऽस्ति तत्प्रेषय । सैन्यं प्रमथगणरूपम् ॥८२॥

परिपालयाम्यहं त्वां निकटेन मया[५६] किमस्ति ते कार्यम् ।
मैवं दूरे रमणे सुभृताऽपि[५७] न मोदते साध्वी ॥ ८३ ॥

परिपालयामीति । त्वां परिपालयामि; निकटेन मया समीपवर्तिना मया, ते किं कार्यमस्ति इति भगवतः प्रश्नमुत्प्रेक्ष्योत्तरमाह–मैवम् । रमणे दूरे सति सुभृतापि सुसंरक्षितापि साध्वी न मोदते, नानन्दं विन्दते । तव सामीप्यमेव निकाममभिलषणीयं मे इति भावः ॥ ८३ ॥

कतिकतिवारं जननं तव नो जातं न मत्स्मृतिः क्वापि ।
इति कुपितोऽसि यदि त्वत्पदयोर्निदधामि मूर्धानम् ॥ ८४ ॥

कतिकतीति । कतिकतिवारं तव जननं नो जातम् । क्वापि कस्मिन्नपि जन्मनि न मत्स्मृतिः ते जाता इति यदि कुपितोऽसि, त्वत्पदयोः मूर्धानं निदधामि । तव पादयोः अद्य शरणं गच्छामि ॥ ८४ ॥

शिव शङ्कर स्मरारे किञ्चित्प्रष्टव्यमस्ति तत्कथय ।
वञ्चनमेव करिष्यसि किं वा कालान्तरे प्रीतिम् ॥ ८५ ॥

शिवेति । हे शिव शङ्कर स्मरारे ! किञ्चित्प्रष्टव्यमस्ति । तत्कथय । किं वञ्चनमेव करिष्यसि, अनुग्रहं अप्रदर्श्य किं वञ्चयिष्यसि, किं वा कालान्तरे भविष्यति काले ते प्रीतिं करिष्यसि । सर्वथा मा मां वञ्चय; मा च प्रीतिं चिरकालादनन्तरं प्रदर्शय, किन्तु अद्यैव प्रकटयेति प्रार्थयति ॥ ८५ ॥

---

५६. ममास्ति ते कार्य—R. ५७. सुभृता नो मो°—R.

योे यन्न[५८] वेत्ति दुःखं कर्म स तस्मिन्नियोजयतु शम्भो ।
भिक्षादुःखं जानंस्तत्र कथं मां नियोजयसि ॥ ८६ ॥

य इति । हे शम्भो ! यः पुरुषः यद् दुःखं कर्म न वेत्ति, स तस्मिन् कर्मणि पुरुषान्तरं नियोजयतु । इदं कर्म इयद्दुःखमिति अजानानः तस्मिन् कर्मणि पुरुषान्तरं व्यापारयतु । त्वं तु न तथा । भिक्षादुःखं जानन् भिक्षाटनावसरे, तत्र भिक्षाकर्मणि मां कथं नियोजयसि । यथा चाह रामभद्रदीक्षितः रामप्रसादस्तवे—

'त्वयि प्रागर्थित्वं भजति बलियज्ञे रघुपते
महत्त्वं ते लुप्तं यदजनि वपुर्वामनतया ।
परेषां किं ब्रूमस्तदिह मयि निक्षिप्य करुणां
यथा नाहं याचे कमपि धनिनं कल्पय तथा ॥ ८६ ॥

काकूक्तिर्मुखदैन्यं शिव मे वाष्पस्तथाश्रुसम्पातः ।
त्वय्येकस्मिन् पुरुषे[५९] सर्वमिदं निष्फलं भवति ॥ ८७ ॥

काकूक्तिरिति । हे शिव ! काकूक्तिः साभिप्रायस्वरभेदेन उक्तिः । मुखदैन्यम् । बाष्पः द्वित्राः अश्रुबिन्दवः, अश्रुसंपातः प्रचुरः । सर्वमिदं त्वय्येकस्मिन् पुरुषे । परुष इति पाठे अकरुणे त्वयि इत्यर्थः । निष्फलं भवति । एषु दुःखानुभावेषु एकैकोऽपि पुरुषसामान्यस्य करुणामुत्पादयितुमलम् । परुषे त्वय्येकस्मिन्नेव संमिलिता अपि एते निष्फलाः ॥ ८७ ॥

शिव देहि मे स्वभक्तिं तृष्णा स्वयमेव यास्यति ततो मे ।
पतिमन्यत्र विषक्तं दृष्ट्वा कान्ता न किं त्यजति ॥ ८८ ॥

शिवेति । हे शिव ! मे स्वभक्तिं त्वद्भक्तिं देहि । ततः मे तृष्णा विषयतर्षः विषयासक्तिर्वा स्वयमेव यास्यति । कथमिव । पतिमन्यत्र अन्यस्यां वनितायां विषक्तं बद्धानुरागं दृष्ट्वा कान्ता न त्यजति किम् । तं पतिमिति शेषः । मय्यसौ विरक्त इति स्वयमेव दूरीभवति ॥ ८८ ॥

---

५८. यो यं न—M, R. ५९. परुषे—M (where original पु is changed to प by means of yellow pigment).

गुणहीनोऽपि शिवाहं त्वत्करमुक्तोऽपि तत् पदं यास्ये।
भ्रष्टोऽपि भूपहस्ताद्गुणतोऽपि शरो यथा लक्ष्यम् ॥ ८९ ॥

गुणेति। हे शिव! अहं गुणहीनोऽपि त्वत्करमुक्तोऽपि तत् परमं पदं यास्ये। चिन्त्यमात्मनेपदम्। अहं निर्गुणोऽपि अवलम्बकेन त्वत्करेण त्यक्तोऽपि मोक्षपदं प्राप्स्यामि। क इव। यथा गुणतोऽपि ज्यागुणाच्च भूपहस्ताद् अपि प्रयोक्तुः भ्रष्टः च्युतः शरो लक्ष्यं यास्यति ॥ ८९ ॥

भक्तजनेष्वनुरक्तं धरणीधरकन्यया परिष्वक्तम्।
प्रख्यातनामधेयं जयतितरां भागधेयं मे ॥ ९० ॥

भक्तेति। प्रख्यातनामधेयं शिवपदस्य मङ्गलार्थकत्वेन प्रसिद्धनामधेयम्। मे भागधेयं शिवरूपं जयतितराम् ॥ ९० ॥

फणिकुण्डलं वहन्ती[६०] श्रवणे ताटङ्कमप्यपरभागे।
सितशोणकान्तियुक्ता काचिन्मद्वासना जयति ॥ ९१ ॥

फणीति। काचिद् मद्वासना अर्धनारीश्वररूपा जयति। एकस्मिन् शिव-भागे फणिकुण्डलम्, अपरस्मिन् पार्वतीभागे ताटङ्कमपि सौवर्णं कर्णभूषणं श्रवणे वहन्ती। सितया शिवभागे शोणया पार्वतीभागे कान्त्या युक्ता ॥९१॥

[६१]आलिङ्गितोऽपि सव्ये शम्पातत्या शिवः प्रकृतितोऽयम्।
करुणाम्बुपूर्णगर्भः कश्चिद्धाराधरो जयति ॥ ९२ ॥

आलिङ्गित इति। सव्ये वामभागे शम्पातत्या पार्वतीरूपया विद्युत्संहत्या आलिङ्गितोऽपि प्रकृतितः स्वभावतः शिवः क्षेमंकरः। विद्युतः प्रायोनाश-कत्वम्, तद्युक्तोऽपि प्रकृत्या शिवः। करुणाम्बुपूर्णगर्भः दयारूपजलपूर्णा-न्तरः अयं कश्चिद्धाराधरः मेघः अर्धनारीश्वरशिवरूपो जयति ॥ ९२ ॥

---

६०. वहंति—R, P.
६१. आलिंगितोपि सख्या शंपार्वत्या शिवप्रकृतितोयं—R.

जटिलं शिरःप्रदेशे निटिले कुटिलं गले तथा नीलम् ।
हृदयीकृताद्रिबालं [६२]विलसति कालं जयत् तेजः ॥ ९३ ॥

जटिलमिति । शिरःप्रदेशे जटिलं जटायुक्तं, निटिले भाले कुटिलं विषमाक्षणा, तथा गले नीलं कालकूटविषेण, हृदयीकृताद्रिबालं हृदयीकृता प्रेमपात्रीकृता अद्रिबाला पार्वती येन तत् । कालं जयत् यमनियन्तृ तेजः शिवरूपं विलसति ॥ ९३ ॥

धनुरेकत्र पिनाकं सशरं बिभ्रत् तथाऽपरत्राऽपि ।
शरमैक्षवं च चापं किञ्चित् तत् प्रेम मे जयति ॥ ९४ ॥

धनुरिति । एकत्र दक्षिणभागे सशरं पिनाकं धनुः बिभ्रत्, तथा परत्रापि सव्यभागेऽपि शरं कुसुममयम्, ऐक्षवं इक्षुविकारभूतं चापं च बिभ्रत् सत् किञ्चिन्मे प्रेम भक्तिविषयीभूतं अर्धनारीश्वररूपं वस्तु जयति ॥ ९४ ॥

वाञ्छितवितरणशीलं[६३] विचित्रलीलं निरालवालं च[६४] ।
ललनालतैकतानं कलये शिवकल्पभूमिरुहम् ॥ ९५ ॥

वाञ्छितेति । वाञ्छितवितरणशीलं अभीष्टदानशीलं, विचित्रलीलं विचित्राः आश्चर्यकर्यः लीला यस्य सः तम् । कल्पवृक्षच्छायायां हि देवानां विचित्रलीलाविलासाः भवन्ति । शिवपक्षे विषभक्षणादयो विचित्रा लीलाः । निरालवालं च, आलवालमधोजलपूरणाधारः तद्रहितम् । देववृक्षाणां जलपोषणावश्यकताभावात् । आलवालशब्दस्य लक्षणया पोषकसामर्थ्यसंभवात् जगत्पोषकस्येश्वरस्य पोषकान्तराभावात् शिवस्यापि निरालवालत्वम् । ललनालतैकतानं पार्वतीरूपा स्त्री एव लता तस्याम् एकतानम् एकप्रवणम्, अर्थात् सदा तदालिङ्गितम्, शिवकल्पभूमिरुहं शिव एव कल्पभूमिरुहः कल्पवृक्षः तं कलये ॥ ९५ ॥

---

६२. विकसति—R ; विलसितकालं—P.
६३. °विवरण°—R.　६४. तं for च—R.

परिहृतदुर्जनतिमिरं नगजानन्दैकसिन्धुवृद्धिकरम्[६५] ।
नन्दितभक्तचकोरं वन्दे चन्द्रोदयं कञ्चित् ॥ ९६ ॥

परिहृतेति । चन्द्रोदयस्य प्रसिद्धानि फलानि तिमिरापहारः समुद्रवर्धनं चकोरप्रीणनं च । एवं शिवरूपचन्द्रोदयस्यापि दुर्जनपरिहारः पार्वतीहर्ष-प्रवर्धनं भक्तजनप्रीणनं च ॥ ९६ ॥

निखिलनिगमैकदुग्धां [६६]दानविदग्धां शुकादिमुनिदुग्धाम् ।
वपुषा सदैव मुग्धां कलये[६७] शिवकामधेनुमहम् ॥ ९७ ॥

निखिलेत्यनेन शिवं कामधेनुतया वर्णयति । निखिलनिगमाः सर्ववेदा एव एकं दुग्धं पयः यस्याः सा, ताम् । दाने विदग्धा पट्वी ताम् । शुकादि-मुनिभिः दोहकभूतैः दुग्धाम् । वपुषा मुग्धां मनोहराम् शिवकामधेनुमहं सदैव कलये ॥ ९७ ॥

नि[६८]त्यप्रभाभिरामं विदलितकामं सदार्धधृतभामम् ।
हृदि कोमलं निकामं श्रीशिवचिन्तामणिं वन्दे ॥ ९८ ॥

नित्येत्यनेन । शिवं चिन्तामणितया वर्णयति । नित्यप्रभया अभिरामम् स्वतःप्रकाशस्वरूपत्वात् । विदलितकामं दग्धमन्मथम् । मणिपक्षे विदलिताः पूरणद्वारा परिहृताः कामाः येन सः, तम् । सदा अर्धधृतभामम् अर्धे शरीरार्धे, धृता भामा स्त्री येन सः तम् अर्धनारीश्वरम् । सदा अर्धः वृद्धिः यस्य सः ।

---

६५. °सिद्धिवृद्धि°—R. ६६. दानवदुग्धां—R.

६७. मुग्धां शिवकामदुधां निकाममवलंबे—R.

६८. This stanza is om. by R and निर्व्याधि मे etc. is given as the 98th and

कुरु बहुशास्त्राभ्यासं साधय योगांश्च तेन सुलभोऽहम् ।
कथमत्र नायमात्मेत्यादि शृण्वन्मनः कुर्यात् ॥

is given as the 99th.

SRI JAGADGURU VISHWARADHYA
SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. ......1985......

धृता भा कान्तिः मा लक्ष्मीश्च येन सः । सदार्धश्चासौ धृतभामश्च तम् इति चिन्तामणिपक्षे । हृदि निकामं कोमलमित्यनेन व्यतिरेकः । मणिस्तु अन्तः-कठिन एव । शिवस्तु अन्तःकोमलः । तादृशं शिवचिन्तामणिं वन्दे ॥ ९८ ॥

निर्व्याधि मे शरीरं निराधि चेतः सदा समाधिपरम् ।
कुरु शर्व सर्वदा त्वं नान्यं कामं वृणे काञ्चित् ॥ ९९ ॥

निर्व्याधीति । हे शर्व ! मे शरीरं निर्व्याधि; चेतस्सदा निराधि समाधि-परं च सर्वदा त्वं कुरु; नान्यं कञ्चित् कामं वृणे । यदि वपुररोगं मनश्च आर्तिहीनं त्वत्समाधिमग्नं च भवेत्, को वास्ति परः प्रार्थनीयः कामः ? यथाह श्रीनीलकण्ठदीक्षितः शान्तिविलासे—

भव्ये देहे पटुषु करणेष्वालये श्रीसमृद्धे
कौमारान्ते वयसि कथमप्यप्रवृत्ते च दुःखे ।
प्रत्यक्पुष्पीप्रसवविधया यस्य पुंसो निसर्गात्
प्रत्यग्वक्त्रं भवति हृदयं कस्ततोऽप्यस्ति धन्यः ॥

निर्व्याधीत्यस्य स्थाने क्वचित्कोशे 'कुरु बहु शास्त्राभ्यासम्' इति श्लोकः दृश्यते । कुरु बहुशास्त्राभ्यासम्; योगाभ्यासांश्च साधय; तेन शास्त्र-योगाभ्यासेन अहं सुलभः इति हे शिव त्वं वदसि किमित्युत्प्रेक्ष्य प्रत्याह—नायमात्मेत्यादि । 'नायमात्मा प्रवचनेन लभ्यः न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम् ॥' इत्यादि श्रुत्युदितं वचनजातं शृण्वन् जनः अत्र शास्त्रादौ कथं मनः कुर्यात् । श्रुतिषु यथा त्वयैवोद्घोषितं तथा त्वमेव मां वृणुष्व ॥ ९९ ॥

आर्यापतेः पदाब्जे निहितं शतपद्यपत्रमयपुष्पम् ।
आर्याशतं सुकृतिनां हृदयामोदं सदा वहतु ॥ १०० ॥

स्तुतिग्रन्थमुपसंहरति कविः आर्यापतेरिति । आर्यापतेः पार्वतीपतेः पदाब्जे निहितं शतपद्यपत्रमयपुष्पं शतं पद्यान्येव पत्राणि तन्मयं पुष्पं कमलं तद्रूपं आर्याशतं आर्याणां शतं सुकृतिनां हृदयामोदं सदा वहतु ॥ १०० ॥

अप्पय्यस्य ग्रन्थः शिवभक्तिः मित्रकार्यसंपत्तिः ।
अत्रान्वेतुं वृत्त्या पर्याप्ता किं न हेतुसामग्री ॥
यत्सव्यदक्षिणार्धप्रकटीकृतशब्दभावसाहित्यम् ।
तेजस्तदर्धनारीमयमनया प्रीयतां वृत्त्या ॥

॥ इति भरद्वाजकुलतिलकश्रीमदप्पय्यदीक्षितविरचितशैवार्याशतकस्य
श्रीराघवशर्मणा कृता वृत्तिः संपूर्णा[६९] ॥

। आर्याशतकं समाप्तम् ।

---

६९. The colophon in M: श्रीमदपय्यदीक्षितविरचितार्याशतकं संपूर्णं ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ कलंकी शीतांशुः कुटिलहृदया सापि तटिनी पशुर्नंदी सोयं कठिगहृदया शैलतनया । निषेधादन्येषां सततसमवेते दयितया कृतां वा मद्भक्ति भव भवति विज्ञापयति कः ॥ ॥ ॥

अपय्यादीक्षितकृतशतक पत्रें ६.

The colophon in R: इति श्रीसद्भरद्वाजकुलतीलकश्रीमदंपया-दीक्षितविरचितं शैवार्याशतकं समाप्तं ॥ श्रीरस्तु ॥ शुभं भवतु ॥

The colophon in P: इति श्रीमद्दापय्यादीक्षितविरचितशिवार्याशतकं समाप्तं ॥ ॥ छ ॥ श्रीसांबार्पणमस्तु शके १७२४ चैत्र वद्य १२ गुरुवासरे इदं पुस्तकं समाप्तं ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥



अकारादि–वर्णानुक्रमेण श्लोकसूची

Select Opinions and Reviews

A BIBLIOGRAPHY OF THE RĀMĀYAṆA

By N. A. Gore, M.A.

Published by the author. Poona, 1942.

Price Re. 1-8-0

—1—

This excellent booklet by Professor Gore of the S. P. College, Poona, is sure to receive an enthusiastic welcome from all serious students of the Rāmāyaṇa.... The material for this Bibliography has been carefully prepared and methodically presented. Different editions of the Rāmāyaṇa, both critical and uncritical, are first described. This is followed by a description of its translations into English and other European and Indian languages. A few important abridgments and epitomes in English, Sanskrit or other languages are mentioned next; and finally all important books of general criticism of the poem as well as articles of a similar nature appearing in the various magazines and periodicals are given. The matter under each head is alphabetically arranged and in many places appreciative or informative remarks are added in rectangular brackets under the different entries. The remarks are a sufficient indication to show that the author was not working in a purely mechanical manner....

Journal of the University of Bombay, September 1943. — H. D. VELANKAR.

—2—

Mr. N. A. Gore has compiled a meritorious reference work in his *Bibliography of the Ramayana*. It is planned on an extensive scale, and gives carefully-prepared lists of books on all aspects and subjects connected with the *Ramayana*, in all languages—eastern and western. It also gives excellent educative notes, culled from various sources, which betray the extensive learning of the author. An appendix brings together many extracts from standard works relating to subjects relevant to the *Ramayana*. Altogether, *A Bibliography of Ramayana*, reflects credit on the knowledge and scholarship of the author, and it should find a place in every library not only in India, but where-ever Indian literature and culture are studied and appreciated. It must have cost the compiler much time and labour, and we hope it will find a large market, which it fully deserves by reason of its out-standing merits, and great utility to the students of the *Ramayana*.

June 1943. HINDUSTAN REVIEW, Patna.

—3—

This small work is an interesting and useful contribution to Epic Studies... it is conceived in the proper spirit and makes the right beginning towards the compilation of bibliographical material, which the growing vastness and extremely specialised character of every branch of oriental study necessitates. The work gives a compilation of most of the noteworthy publications on the Rāmāyaṇa, including in its scope Text-editions, Translations, Adaptations, and Critical and Literary Notices or Studies in journals or separate publications. In some cases the compiler adds short notes on the general content or substance of important works or articles.

The Indian Historical Quarterly, Vol. XIX, 1943. DR. S. K. DE.

—4—

This is a small book............in which the young author has collected together a wealth of information about the great Epic.... He gives information about the text editions, translations, abridgments and epitomes; then he gives the bibliography for criticism.

...Then there is a long appendix in which he gives extracts from authoritative writers on various interesting points connected with the Rāmāyaṇa, like epic language, poetic art and inter-relation of Rāmāyaṇa and Mahābhārata. In the second appendix he gives a few points for study and with a subject-index and abbreviations, the book ends.

The Adyar Library Bulletin. DR. C. KUNHAN RAJA.

—5—

Professor Gore's *Bibliography of the Rāmāyaṇa*, the pioneer attempt in the field of Sanskrit literature, will answer a long-felt want.

The book is divided into nine sections, the first five of which deal with Bibliography proper covering 366 entries in all. Then follow "Extracts" from standard authors on topics connected with the *Rāmāyaṇa*, useful chiefly to students, "Points for study of the *Rāmāyaṇa*," a "Subjects Index" and "Abbreviations."

Summaries and lists of contents have been incorporated in the case of important books and articles. The author has tried to make the book as comprehensive as possible, and deserves to be congratulated on the admirable and satisfactory manner in which he has executed his work.

We strongly recommended the book to every Oriental scholar....

The Indian P. E. N. }
1 July, 1943. } DR. A. D. PUSALKAR.

—6—

.........I have carefully peeped through it with much benefit. You have brought so much useful and relevant information that it has become an indispensable companion to students of the Rāmāyaṇa.

Kolhapur, 11 April, 43. Dr. A. N. Upadhye.

The Ṛjulaghvī or The Mālatīmādhava Kathā

Of Pūrṇasarasvatī, critically edited for the First Time with an Introduction, Indexes and Notes by Prof. N. A. Gore, M.A. with a Foreword by Dr. V. Raghavan, M.A., Ph.D.

—1—

Prof. Gore's painstaking work on the present edition is, I believe, a direct testimony of his being a *Samānadharmā* to both the poet and his poet, commentator Pūrṇasarasvatī. Love in its widest sense makes life worth-*living* and worth-*loving*. It exercises a potent humanizing influence on the roughest mortals in this world owing to its inward appeal. This epitome of Bhavabhūti's love-drama will, therefore, be read with delight by the Sanskrit-knowing public on account of its skilful presentation of the *Mālatīmādhava Kathā* by the author. I fully endorse Dr. Raghavan's recommendation in his Foreword with regard to this work when he remarks : " The *Ṛjulaghvī* will surely be profitable to students who study the *Mālatīmādhava* for examinations and as a Khaṇḍa-Kāvya it can also be independently prescribed for study in the Intermediate Classes of our Colleges."

I congratulate Prof. Gore, the editor of the Poona Orientalist on his scholarly critical edition of the *Ṛjulaghvī* published by him for the first time on the strength of manuscript material unknown to Aufrecht's *Catalogous Catalogorum*.

Indian Antiquary, February, 1944. P. K. Gode.

—2—

... The *Ṛjulaghvī* is a poetic version of the story of *Mālatīmādhava* of Bhavabhūti and, as the name indicates, it is both straight (ṛju) and brief (laghu) in the narration of the rather intricate plot of the play....The work under review is a metrical representation of the story of the *Mālatīmādhava*.

While the author is very faithful in narrating the story of the *Mālatīmādhava*, it must be said that he is quite **original and refreshing.** The verses are very simple; sometimes there are very beautiful descriptions. There is a variety of metres used in the narration. The work has its own literary value, apart from its importance as an introduction for the study of the drama....

In bringing out the edition, the Professor has taken considerable pains to reconstruct a readable text; and considering the fact that he had to depend on a single manuscript, and that only a recent transcript and not the original, **he has done his work exceedingly well.** The introduction gives a full account of the text, and one gets a clear idea of the text from this introduction. In the foot-notes the editor gives the reading founds in his original and also explains the reasons that led him to adopt a particular emendation. Comparing the reading as found in the original used with the text as it is printed after reconstruction, one can understand that the editor had a very difficult task before him. The text is followed by an alphabetical index of verses in which the metre is also noted after the passage, an index of the metres used in the text with the number of verses in the particular metres and also an alphabetical list of verses taken in this narration from the *Mālatīmādhava*. The notes that follow give meanings of rare words that need explanation and grammatical points and other guides that help a reader

in understanding the text, along with a few corrections in the printing of the text.

The edition is a model of accurate preparation of the text for the press after careful examination of the matter available; there are very few printing mistakes. The printing and get up are very good, just what we have been accustomed to in this series.


The Adyar Library, Bulletin. } Dr. C. Kunhan Raja.

Copies of the books can be had of

1. The author, 12, Vishnu Sadan, 327, Sadashiv, Poona 2
2. The Oriental Book Agency, Poona.

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY.
Jangamwadi Math, VARANASI,
Acc. No. 2240 1985
1678

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 1985







By the Same Editor

1. **The Pauma-cariya** (ch. 33–35) of Vimala Sūrī. In collaboration with Prof. R. D. Laddu, M. A., 1942. Re. 1–8–0.

2. **A Bibliography of the Rāmāyaṇa** with 14 extracts very useful for the study of Rāmāyaṇa, 1943. Re. 1-8-0

3. **The Ṛjulaghvī** or the Mālatīmādhava–Kathā of Pūrṇasarasvatī. Published for the first time with an Introduction, Notes and Indexes. With a Foreword by Dr. V. Raghavan, M A., Ph.D. Poona Oriental Series No. 83. 1943. Rs. 2–0–0.

4. **The Svapnavāsavadattam** of Bhāsa with an Introduction, a complete translation into English, Appendices and a Bibliography. In Collobaration with Prof. Dr. M. A. Mehendale, M.A., Ph.D., 1944. Rs. 3–4–0.

By Dr. V. Raghavan

1. **Bhoja's Śṛṅgāra Prakās'a**, Karnatak Publishing House, Bombay, 1940.
2. **The Number of Rasas**, The Adyar Library, Adyar, 1940.
3. **Some Concepts of Alaṅkāra Śāstra**, The Adyar Library, Adyar, S. I. 1942.